वर्षम्-२ अङ्कः-६

# संस्कृतवार्ता

## राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५१११ वैक्रमाब्दः २०६६ आश्विनशुक्ल १२ – पौषशुक्ल १५ शकः १९३१ अक्टूबर् - दिसम्बर् २००९



## कुलपतिवाक्



स्थापनादिवसोत्सवे कर्णसिंहं सम्मानयन् कुलपतिः

**विदितमेव** एतद् विदुषां यद् बहुभाषाव्यवहारपरायणे अस्माकं देशे अतिप्राचीनकालात् संस्कृतं, प्राकृतं पालिश्चेति तिस्रो भाषाः प्रवृत्तिं प्राप्ताः। विद्यते च एतासां भाषाणां परस्परं घनिष्ठः सम्बन्धः। अत एव उचितमेव अस्माद् वर्षात् संस्थानस्य पाठ्यचर्यायां संस्कृतेन साकं पालि-प्राकृतभाषयोरध्ययनमपि विधिवदारब्धम्, तथा च अनयोर्भाषयोर्विकासाय तासां तासां योजनानां प्रवर्तनमपि संस्थानेनाङ्गीकृतम्। पालिवाङ्मयानुसारेण बौद्धधर्मदर्शनेषु सार्वभौमादर्शानधिकृत्य देहल्यामेका अन्ताराष्ट्रिया सङ्गोष्ठी समायोजिता, तथा च प्राकृतभाषानुसारेण भारतीयपरम्पराणां वैविध्यं बहुलतां चाधिकृत्य एका अखिलभारतीया सङ्गोष्ठी संस्थानस्य जयपुरपरिसरे समायोज्यत। पालिभाषाया अध्ययनकेन्द्रं लखनऊपरिसरे, प्राकृतभाषाया अध्ययनकेन्द्रं च जयपुरपरिसरे आरब्धे।

राष्ट्रियसंस्कृतसंस्थानमैषमः पूर्वोत्तरराज्येषु ऐदम्प्राथम्येन पदक्षेपं व्यदधात्। सिक्किमप्रदेशस्य राजधान्यां हिमालयमेखलासु मेखलायामिव राजमानायां गेङ्टोकनगर्याम् 'पूर्वोत्तरराज्यानां संस्कृतेऽवदानम्' इति विषयमवलम्ब्य राष्ट्रिया सङ्गोष्ठी समायोजिता। अथ सद्य एव मणिपुरराज्यं निकषा इम्फालनगरे नाम्बोलग्रामेऽवस्थितः संस्थानेन सम्बद्धो राधामाधवसंस्कृतमहाविद्यालयः मानवसंसाधनविकासमन्त्रालयेन आदर्शमहाविद्यालय इति घोषितः। प्रतिवर्षं संस्थानं अखिलभारतीयं नाट्यप्रयोगमहोत्सवमायोजयति, २०१०तमस्य वर्षस्यायं महोत्सवः त्रिपुराराज्ये अगरतलापुर्यां फेब्रवरीमासस्य १५-१६-१७-तिथिषु समायोजयिष्यते। संस्थानेन जयपुरे अखिलभारतीया शलाकापरीक्षा अखिलभारतीया संस्कृतभाषणस्पर्धा च समायोजिते। तत्रापि इदम्प्रथमतया सिक्किमप्रदेशस्य छात्रौ सम्मिलितौ अभिनन्दनभाजौ च सञ्जातौ।

ग्रन्थादिप्रकाशनक्षेत्रे अस्मिन् वर्षे केचन अभिनवा उपक्रमा विहिताः। संस्कृते नवीनज्ञानविज्ञानविषयानाश्रित्य अनूदिता मौलिका वा ग्रन्था अपेक्ष्यन्ते इति शिक्षाप्रशासनं विद्यालयसङ्घटनं च विषयीकृत्य विरचितस्य मूलग्रन्थस्य अनुवादः सरलसुबोधया भाषया सद्यः प्रकाशितः। विंशशतके नैके अभूवन् महान्तः संस्कृतरचनाकाराः। तेषां प्रबन्धाः सम्प्रति दुर्लभाः। अतश्च शोधकर्तॄणां च कृते तेषां साहित्यमुपलम्भनीयमिति कासाञ्चन ग्रन्थमालानां प्रकाशनमङ्गीकृतम्। तासु गुर्जरप्रदेशस्य सुप्रथितसाहित्यकाराणां मूलशङ्करमाणिकलालयाज्ञिकवर्याणां त्रयाणां नाटकानां सङ्कलनं मूलशङ्करग्रन्थावल्यां प्रकाशमेति। आधुनिकसंस्कृतसाहित्ये भट्टश्रीमथुरानाथशास्त्रिणः मञ्जुनाथापरनामानः आसन् युगप्रवर्तकाः, नूतनविधानां स्रष्टारः, आविष्कर्तारश्चाकृष्टक्षेत्राणाम्। एतेषामपि महाकवीनां साहित्यं सम्प्रति सुदुर्लभं जातमिति राष्ट्रियसंस्कृतसंस्थानेन पुनः प्रकाशनमुपक्रान्तम्। अस्मिन् क्रमे मञ्जुनाथग्रन्थावल्याः प्रथमो भागः ऐषमः प्रस्तुतः। अस्मिन् प्रथमे भागे भट्टकवीनां जयपुरवैभवम्, गोविन्दवैभवम् साहित्यवैभवं चेति त्रीणि काव्यसङ्कलनानि प्राकाश्यतां नीयन्ते। अस्मिन्नेव वर्षे उदयनाचार्यप्रणीतस्य आत्मतत्त्वविवेकाख्यग्रन्थरत्नस्य आचार्यकृष्णमाधवझाविरचिता अद्यावधि अप्रकाशिता विवेकार्थप्रकाशिकेति व्याख्या स्वर्गीयश्रीमदच्युतानन्ददाशसम्पादिता मूलग्रन्थसहितं प्रकाशमेति। अथ दृश्यश्रव्यमाध्यमैः शिक्षणस्योपादेयतां परिलक्ष्य सम्प्रति नैकाः दृश्याः श्रव्याश्च सान्द्रमुद्रिकाः निर्माप्यन्ते विनिर्मिताश्च। शब्दकल्पद्रुमः, दीक्षापाठ्यक्रमाणां पुस्तकानि, श्रीनिवासरथ-रामकरणशर्म-प्रभृतिमहाकवीनां काव्यानि, संस्थानस्य नाट्यमहोत्सवेषु प्रस्तुतानि रुचिकराणि नाट्यानि च एतेन नवीनमाध्यमेन प्रस्तुतानि। किं बहुना, संस्कृतसमुत्थानाय यथाशक्ति यतामहे, अतः परं चैतदेवाशास्महे-



देहलीमुख्यमन्त्रिवर्याम् शीलादीक्षितां संस्थानस्य क्रियाकलापानां विषये संसूचयन् कुलपतिः रा.व. त्रिपाठी

**विद्वज्जनसंस्थानं वाग्देव्याराधनस्थानमेकम्।**
**भवतु सदा संस्थानं सत्यं च संस्कृतसंस्थानम्।।**

*–राधावल्लभः त्रिपाठी*

**मुख्यपरामर्शदाता**

आचार्यः राधावल्लभः त्रिपाठी

कुलपतिः

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**

आचार्यः रामानुजदेवनाथः, नवदेहली

प्रा. जि. गङ्गन्ना, पुरी

प्रा. विश्वमूर्तिशास्त्री, जम्मू

प्रा. सुरेन्द्रझाः, इलाहाबादम्

प्रा. आजादमिश्रः, भोपालम्

प्रा. प्रकाशपाण्डेयः, गरली

प्रा. के.टी. माधवन्, गुरुवायूरु

प्रा. सर्वनारायणझाः, लखनऊ

प्रा. अर्कनाथचौधरी, जयपुरम्

प्रा. एम्.ए. बाबुः, मुम्बई

प्रा. ए.पि. सच्चिदानन्दः, मुम्बई

**सम्पादकमण्डलम्**

डॉ. शुक्ला मुखर्जी

डॉ. रत्नमोहनझाः

कू. वेङ्कटेशमूर्तिः

'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायम्, अत्र प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

ISSN : 975

प्रकाशकः

**राष्ट्रियसंस्कृतसंस्थानम्**

(मानितविश्वविद्यालयः)

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058

011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

## प्रतिवार्ता




☼ यथाकालमस्माभिरधिगतं विमृष्टं च संस्कृतशिक्षायाः सर्वोच्चसंस्थानेन राष्ट्रियसंस्कृतसंस्थानेन लोकलोचनगोचरीकृतस्य त्रैमासिकसंस्कृतवार्तापत्रकस्य प्रथमवर्षान्तर्गतमङ्कचतुष्टयजातम्। यथास्य वार्तापत्रकस्य बन्धपुटादिकं बाह्यं कलेवरसंरचनं कस्यचिदपि पाठकस्य हृदयावर्जकं, तथैवास्य अन्तःसंविधानं वैश्विकयोजनान्वितं सार्वभौमिकं कालातिरेकं च सन्देशमादधत् वर्तते। तत्तत्समसामयिकतथ्यजातं जिज्ञासूनां सुरभारतीनिधिभूतशास्त्रानुरागिणां तत्साधकनिष्णातगुणग्राहिणां च सर्वथा मनोऽनुकूलकमिति नात्र सशीतिः। वार्तापत्रकमिदं काव्यसुधालोलुपानां संस्थानकुलपतीनां साम्प्रतिकानां मार्गदर्शने शिखरत्वमधिगच्छत्परिलक्ष्यते।

डॉ. पूर्णचन्द्र-उपाध्यायः, भवानीमण्डी (राजस्थानम्)

☼ संस्कृतवार्तां दर्शं दर्शं वार्धक्येऽपि मे मनसि नवचैतन्यम् उत्पद्यते।

आद्याचरणझाः (बिहारम्)

**राष्ट्रिय-संस्कृत-संस्थानम्, नवदेहली**



**स्वनामधन्यानां मान्यानां वदान्यानां कृतिनां**
**संस्कृतसेवाव्रतिनां ज्ञानपीठपुरस्कारेण सम्मानितानां**
**श्रीमतां सत्यव्रतशास्त्रिणां करकमलयोः**
**स्थापनादिवसमहोत्सवे समर्पितम् अभिनन्दनम्**

**अयि! पदवाक्यप्रमाणपारावारपारीणाः**
**विविधविद्यानदीष्णाः काव्यकलाधुरीणाः पण्डितप्रवराः!**
**अत्रभवतां भवतां संस्कृतसेवाः स्मारं स्मारं**
**सर्वेऽपि वयं कृतकृत्यतां कृतार्थतां चानुभवामः।**

किं बहुना,

**आकारं प्राप किं वा विमलधवलिता चारुदेवस्य कीर्तिः**
**प्रज्ञा प्राच्यप्रतीच्यप्रतिनिधिविदुषां साऽवतीर्णा धरायाम्।**
**उन्मेषं वा प्रयाता पुनरपि सरसा कालिदासस्य वाणी**
**आलोक्य त्वां गुणज्ञं विदधति सुधियस्ते विकल्याननेकान्।।**
**ज्ञानपीठपुरस्कारं प्राप्य साहित्यगौरवम्।**
**पीठं स्वयं सरस्वत्याः पराकाष्ठां निनाय यः।।**
**एकोनाशीतिवर्षीयोऽप्यद्वितीयतया युवा।**
**महारम्भो महोत्साहः साहित्यस्य महोत्सवः।।**
**सत्त्वोद्रेकस्य धाम्ना निधिरिव विहितः कोऽप्यपूर्वो विधाता**
**शास्त्राणां पारदृश्वा मधुमयभणितेर्मार्गदर्शी कविर्यः।**
**नादः कोऽप्येष रम्यो ललितमधुरो भारतीझङ्कृतीनां**
**जीयाद् वर्षान् शतं स व्रतनियमदृढः शास्त्रिवर्यः स सत्यः।।**

इति श्रीमतः सत्यव्रतशास्त्रिणः कर्तृत्वं च कवित्वं च भावयन्तः कामयन्ते।

नवदेहली
कार्तिककृष्णद्वादशी, वै. २०६६
१५.१०.२००९

**कुलपतिः**
राष्ट्रियसंस्कृतसंस्थानम्
सर्वे संस्कृतपरिवारसदस्याश्च

## स्थापनादिवसः समनुष्ठितः



डॉ. राधाकृष्णन्-स्मृतिव्याख्यानं कुर्वन् कर्णसिंहः

स्वस्थापनाकालादारभ्य अनुदिनम् एधमानेन राष्ट्रियसंस्कृतसंस्थानेन १५-१०-२००९तमे दिनाङ्के ४०तमे वर्षे पादार्पणं कृतम्। सन्दर्भेऽस्मिन् संस्थानेन नवदेहल्यां फिक्की-प्रेक्षागृहे स्थापनादिवसमहोत्सवः आचरितः। संस्थानस्य संस्थापकनिदेशकस्य आचार्यस्य रामकरणशर्ममहोदयस्य सारस्वतातिथित्वे, कुलपतेः आचार्यस्य राधावल्लभत्रिपाठिनः आध्यक्ष्ये च आयोजिते अस्मिन् कार्यक्रमे डा. राधाकृष्णन्-स्मृतिव्याख्यानम्, ज्ञानपीठप्रशस्तिभाजः आचार्यस्य सत्यव्रतशास्त्रिमहोदयस्य अभिनन्दनं च कृतम्। आरम्भे संस्थानकुलपतिः त्रिपाठिमहोदयः सर्वान् विदुषः स्वागतीकृत्य प्रवर्धमानस्य संस्थानस्य विविधगतिविधीनां विवरणं संक्षेपेण प्रास्तौत्, संस्थानस्य स्थापने यशसः अभिवर्धने च आचार्य-रामकरणशर्मणः योगदानं विशदीकृतवान्। सत्यव्रतशास्त्रिवर्यस्य ज्ञानपीठपुरस्कारप्राप्तिः संस्कृतकुलगौरवाय कल्पत इति च तेन प्रत्यपादि। डा. राधाकृष्णन्-स्मृति-व्याख्यानाय समाहूतस्य राजनैतिक-प्राशासनिककार्येषु व्यापृतस्यापि डा. कर्णसिंहस्य वैदुष्यं, दार्शनिकत्वं, संस्कृताभिमानं च उद्दिश्य विवरणं कृतम्। राज्यसभासदस्यः डा. कर्णसिंहः 'आधुनिकयुगे वेदान्तः' इति विषयमवलम्ब्य बोधप्रदं भाषणमकरोत्। स्वभाषणारम्भे सः शिक्षकाणामादर्शभूतं राधाकृष्णमहोदयं संस्मृत्य स्वस्य राधाकृष्णमहोदयेन सह जातम् अनुभवं श्रावितवान्, तस्य वैदुष्यपूर्णं दार्शनिकव्यक्तित्वं च निरूपितवान्। पश्चात् औपनिषदम् ऐकात्म्यं प्रतिपाद्य आधुनिककाले अनुभूयमानानां समस्यानां निवारणाय, शान्त्यै च वेदान्ततत्त्वं कथमुपयोज्यम् इति सम्यक् व्यवृणोत्। समाजे सामरस्य-स्थापनाय वेदान्ततत्त्वानुशीलनं भवेदिति अभिप्रायः तेन प्रकटितः। आचार्यः रामकरणशर्मा संस्थानस्य प्रतिष्ठापना-वसरे विहितान् प्रयासान्, तदवसरे विभिन्नैः उच्चाधिकारिभिः कृतान् सहयोगान् च संस्मार्य संस्थानमिदं संस्कृतकार्येषु बद्धश्रद्धं सत् उत्तरोत्तरम् अभिवर्धताम् इति शुभाशयान् प्रायच्छत्। संस्थानकुलपतिः आचार्यः राधावल्लभ-त्रिपाठी संस्कृतक्षेत्रे सर्वप्रथमं ज्ञानपीठपुरस्कारं प्राप्तवतः आचार्यस्य सत्यव्रतशास्त्रिवर्यस्य अभिनन्दनपूर्वकं प्रशस्तिवाचनम् अकरोत्। वेदिकायामुपस्थितैः महद्भिः श्रीफलोत्तरीयादिभिः सत्यव्रतशास्त्रिणः सम्माननमपि कृतम्। सभायामुपस्थितैः पुरप्रमुखैर्विद्वद्भिश्च पुष्पमालादिभिः तस्मै अभिनन्दनं समर्पितम्। सम्मानोत्तरं भाषमाणेन सत्यव्रतमहोदयेन संस्कृतवाङ्मयसेवावसरे स्वयमनुभूताः विविधाः स्फूर्तिप्रदाः घटनाः श्राविताः। संस्कृतमातुः सेवानिमित्तं लब्धः पुरस्कारः 'इतोऽप्यतिशयेन संस्कृतसेवा करणीया इत्यभिप्रेरयति' इति आशयश्च तेन विदुषा प्रकटितः। संस्थानकुलसचिवः आचार्यः रामानुजदेवनाथः उपस्थितेभ्यः सर्वेभ्यः धन्यवादं व्यज्ञापयत्। एतदनन्तरं, सागरविश्वविद्यालयात् समाहूतेन श्रीमता सञ्जयद्विवेदिना शङ्करभगवत्पादविरचितस्य भजगोविन्दस्तोत्रस्य, राधावल्लभविरचितस्य गीतधीवरस्य च सुश्राव्यं गानं कृतम्। तत्पश्चात् आन्ध्रप्रदेशस्य कपिलेश्वरपुरतः समागताः श्रीसर्वराया-हरिकथापाठशालायाः छात्राभिः प्रदर्शितेन नयनमनोहरेण दशावतार-नृत्येन सर्वे आनन्दिताः।




रा. देवनाथः, सत्यव्रतशास्त्री, रामकरणशर्मा, कर्णसिंहः, रा.व.त्रिपाठी




श्रीसर्वराया-हरिकथापाठशालायाः छात्राभिः प्रदर्शितं नृत्यम्

मुख्यालयवार्ता

# सम्पन्नः कौमुदीमहोत्सवः



कौमुदीमहोत्सवम् उद्घाटयन्ती शीलादीक्षितवर्या,
पार्श्वे अनिता भटनागर-जैन

कौमुदीमहोत्सवनाम्ना प्रथितः संस्थानस्य अन्तःपरिसरीयः संस्कृतनाट्योत्सवः नवम्बरमासस्य दशमदिनाङ्कात् द्वादशदिनाङ्कं यावत् (१०तः १२ नवम्बर २००९) नवदेहल्यां प्यारेलालभवने भव्यतया सम्पन्नः। देहल्याः मुख्यमन्त्रिवर्या श्रीमती शीलादीक्षितमहोदया कार्यक्रमं समुद्घाट्य शुभाशंसनम् अकरोत्। उद्घाटनभाषणं कुर्वत्या तयोक्तं यत् 'मधुरा, ज्ञानभण्डारसमृद्धा प्राचीना भाषा संस्कृतमिति जगद्विदितमस्ति। विज्ञानस्य मूलं संस्कृतेऽस्ति। भाषेयं समादरणीया। नाट्यकलाद्वारा दृश्यश्रव्यमाध्यमेन संस्कृतभाषाश्रितकार्यक्रमैः एतस्याः भाषायाः प्रभावः समाजे स्यात्' इति। संस्कृतभाषा व्यवहारपथे समागच्छेदिति अभिप्रायेण काचिद्विशिष्टा संस्कृतदिनपत्रिका प्रकाशनीया इत्यपि तया प्रोक्तम्।

ततः पूर्वं कार्यक्रमारम्भे स्वागतभाषणं कुर्वता संस्थानकुलपतिना आचार्येण राधावल्लभत्रिपाठिवर्येण ऐषमः कौमुदीमहोत्सवस्य वैशिष्ट्यमभिवर्णितम्। 'अधुना अनुष्ठीयमानः सप्तमः संस्कृतनाट्योत्सवः। पूर्वतनवर्षेषु अस्मिन् प्रसङ्गे विभिन्नानि नाटकानि परिसरच्छात्रैः प्रस्तूयन्ते स्म। परम् अस्मिन् वर्षे सप्त-परिसरीयैः एकैकमङ्कमादाय अभिज्ञानशाकुन्तलं समग्रं प्रस्तूयते, तदतिरिच्य परिसरत्रयेण अन्यप्रस्तुतित्रयम्, नाट्यपरिषदा विक्रमोर्वशीयस्य अविकला प्रस्तुतिः च वैशिष्ट्यम् अस्य नाट्योत्सवस्य' इति कुलपतिना विवृतम्।


कार्यक्रमे समुपस्थिता मानवसंसाधनविकासमन्त्रालयस्य संयुक्त-सचिवा (भाषा) डा. अनीता-भट्नागरजैनमहोदया अवादीत् यत् छात्राणां स्कन्धेषु संस्कृतविकासस्य भारः वर्तते। संस्कृतनाट्यकलापोषणाय संस्थानेन क्रियमाणः प्रयासः अभिनन्दनीयः इति। मुख्यातिथिरूपेण आचार्यः पङ्कजचान्देवर्यः (कुलपतिः, क.कु.गुरु-कालिदास-सं.वि.वि. रामटेक्) समाहूत आसीत्। संस्कृतनाट्यमञ्चनस्य महत्त्वं प्रतिपादयता तेन भणितं यत् संस्कृतनाट्यमञ्चनेन मनोरञ्जनं ज्ञानवर्धनं च प्रेक्षकाणां छात्राणां च स्यात् इति। उद्घाटनसत्रान्ते संस्थानकुलसचिवः आचार्यः रामानुजदेवनाथः धन्यवादं व्याहरत्। तदनन्तरं मणिपुरस्य राधामाधवसंस्कृतमहाविद्यालयस्य छात्रैः प्रदर्शिता पारम्परिकी सनृत्यमङ्गलवाद्यप्रस्तुतिः सर्वेषां मोदाय अकल्पत। उद्घाटनसत्रात् परम् अपराह्णे शृङ्गेरीस्थ-राजीवगान्धी-परिसरेण पूर्वरङ्गं प्रादर्शि। तदनन्तरं भोपालपरिसरेण कालिदासस्य अमरकृतेः शाकुन्तलस्य प्रथमाङ्कं प्रदर्श्य कथायाः शुभारम्भः कृतः। पुरीतः समायातैः छात्रैः प्रतिमानाटकम् अभिनीतम्। तस्मिन् दिने अन्ते मञ्चिता आमन्त्रितप्रस्तुतिः 'विक्रमोर्वशीयम्' मध्यप्रदेशेस्य सागरस्थया नाट्यपरिषदा नाट्यायनसहयोगेन अभिनीतमासीत्। अभिज्ञानशाकुन्तलस्य द्वितीय-तृतीय-चतुर्थाङ्काः, इन्द्रजालनामकं नाटकं च द्वितीये अहनि (११.११.१० दिनाङ्के) क्रमशः जम्मू-गरली-शृङ्गेरी-इलाहाबाद्-इत्येतेभ्यः प्रदेशेभ्यः समागतैः परिसरच्छात्रैः प्रदर्शितानि। द्वितीयदिने सायं सागरविश्वविद्यालयस्य श्रीमता सञ्जयद्विवेदिना प्रस्तुतेन सुमधुरसंस्कृतगीतालापेन रञ्जितं सहृदयानां मानसम्। तत्पश्चात् चेन्नैनगरात् समाहूतेन संस्कृतरङ्ग-नाट्यदलेन 'मत्तविलासप्रहसनम्' प्रदर्श्य सर्वे हास्यरसे निमज्जिताः।




रामानुजदेवनाथः, अनिता भटनागर-जैन, शीलादीक्षितवर्या, पङ्कजचान्दे, रा.व.त्रिपाठी

कार्यक्रमस्यान्तिमे दिने लखनऊ-गुरुवायूरु-जयपुरपरिसरच्छात्रैः शाकुन्तलस्य पञ्चम-षष्ठ-सप्तमाङ्काः मञ्चिताः। अन्ते डा. सतीशकुमारमहोदयेन, श्रीनिवासशास्त्रिणा च कृतेन मङ्गलाचरणेन प्रारब्धे पुरस्कारप्रदानसमारोहे मुख्यातिथिरूपेण आचार्यः रामकरणशर्मा

## प्रथमपुरस्कारभाजोः प्रस्तुती



शृङ्गेरीपरिसरेण मञ्चितः शाकुन्तल-चतुर्थाङ्कः



गुरुवायूरपरिसरेण मञ्चितः शाकुन्तल-सप्तमाङ्कः

## द्वितीयपुरस्कारभाजोः प्रस्तुती



जयपुरपरिसरेण मञ्चितः शाकुन्तल-षष्ठाङ्कः



लखनऊपरिसरेण मञ्चितः शाकुन्तल-पञ्चमाङ्कः

(अध्यक्षचरः, अन्ताराष्ट्रियसंस्कृतविद्यासमवायः), आचार्यः वाचस्पति-उपाध्यायः (कुलपतिः, श्री ला.ब.शा.रा.सं.वि., नवदेहली), आचार्यः युगलकिशोरमिश्रः (कुलपतिः, ज. रा. रा. सं. वि. वि, जयपुरम्), आचार्याः गौतमभाईपटेल-अभिराजराजेन्द्रमिश्रप्रभृतयः निर्णायकाः, संस्थानकुलपतिः, कुलसचिवश्च मञ्चे समुपस्थिता आसन्। निर्णायकाः स्वीयानुभूतिं वर्णयित्वा छात्रेभ्यः कुशीलवेभ्यः परामर्शान् प्रायच्छन्। आध्यक्ष्यं निर्वहन् संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी 'ऐषमः कौमुदीमहोत्सवे एकस्यैव नाटकस्य विभिन्नाङ्कानां प्रदर्शनं विभिन्नैः परिसरैः कृतमित्यतः सप्तप्रकारकाः दुष्यन्ताः, विभिन्नप्रकारिकाः शकुन्तलाः च दृष्टाः' इत्यवादीत्। एवं नवनवशैल्या नवकल्पनाभिः पात्रपोषणं कृतिकारम् अवश्यं तोषयेत्; तद्दृष्ट्या अयं प्रयोगः सफलः इत्यभिप्रायं च प्राकटयत्। प्रतिनाट्यदलम् अभिनये प्रथमद्वितीयतृतीयपुरस्काराः, सर्वनाट्यदलेषु प्रथमद्वितीयतृतीयस्थानभाग्भ्यः दलेभ्यः पुरस्काराः, सर्वोत्तमाभिनयाय वैयक्तिपुरस्काराश्च सम्मान्यैर्विद्वद्भिः तत्तदर्हेभ्यः प्रदत्ताः। संस्थानकुलसचिवः आचार्य-रामानुजदेवनाथमहोदयः दण्डकालङ्कृताभिर्वाग्भिः धन्यवादं व्यज्ञापयत्। राष्ट्रगानेन कार्यक्रमोऽयं सम्पन्नतामगात्।

शृङ्गेरीपरिसरेण प्रस्तुतः शाकुन्तलस्य चतुर्थाङ्कः गुरुवायूर्परिसरेण प्रस्तुतः शाकुन्तलसप्तमाङ्कः च प्रथमपुरस्कारेण सभाजितौ।

## तृतीयपुरस्कारभाजोः प्रस्तुती



जम्मूपरिसरेण मञ्चितः शाकुन्तल-द्वितीयाङ्कः



भोपालपरिसरेण मञ्चितः शाकुन्तल-प्रथमाङ्कः

**कौमुदीमहोत्सवे पुरस्कृतौ–**

- सर्वोत्तमौ अभिनेतारौ –१. रवीशहेगडे (शृङ्गेरीपरिसरस्य)
  २. रुद्रनारायणरथः (पुरीपरिसरस्य)
- सर्वोत्तमे अभिनेत्र्यौ – १. अश्विनी हेगडे (शृङ्गेरीपरिसरस्य)
  २. निधिः पी.के. (गुरुवायूरुपरिसरस्य)



सहृदयाः प्रेक्षकाः

## कौमुदीमहोत्सवे
### प्रत्येकं प्रस्तुतौ पुरस्कारभाजः ( प्रथम-द्वितीय-तृतीय-क्रमेण )

| रूपकम् | छात्रनाम | पात्रनाम |
|---|---|---|
| अभिज्ञानशाकुन्तलस्य प्रथमोऽङ्कः | अनुपमगर्गः | दुष्यन्तः |
| | प्रतीक्षा सोनी | शकुन्तला |
| | छाया जाटवः | प्रियंवदा |
| प्रतिमानाटकम् | रुद्रनारायणरथः | भरतः |
| | चन्द्रशेखरहोता | दशरथः |
| | ज्ञानज्योतिमहान्तिः | सीता |
| अभिज्ञानशाकुन्तलस्य द्वितीयोऽङ्कः | नरेन्द्रभारती | दुष्यन्तः |
| | मनोजकुमारः | विदूषकः |
| | पङ्कजशर्मा | सेनापतिः |
| अभिज्ञानशाकुन्तलस्य तृतीयोऽङ्कः | सन्तोषा | अनसूया |
| | कमल-कौशलः | शिष्यः |
| | यतीशकुमार् | दुष्यन्तः |
| अभिज्ञानशाकुन्तलस्य चतुर्थोऽङ्कः | रवीशहेगडे | काश्यपः |
| | अश्विनी एस्. हेगडे | नटी/अनसुया |
| | विनयः एच.वि. | हरिणः |
| इन्द्रजालम् | मुरलीधरमिश्रः | ऐन्द्रजालिकः |
| | कौशलेन्द्रकुमारतिवारी | जमूरा |
| | दयाशङ्करतिवारी | दर्शकः |
| अभिज्ञानशाकुन्तलस्य पञ्चमोऽङ्कः | आशीषकुमारशर्मा | दुष्यन्तः |
| | लक्ष्मीकान्तपाठकः | शार्ङ्गरवः |
| | भूपेन्द्रः | कञ्चुकी |
| अभिज्ञानशाकुन्तलस्य षष्ठोऽङ्कः | अनिलशर्मा | धीवरः |
| | दीपकभारद्वाजः | दुष्यन्तः |
| | देवकीनन्दनशर्मा | विदूषकः |
| अभिज्ञानशाकुन्तलस्य सप्तमोऽङ्कः | निपिन् पी. | दुष्यन्तः |
| | निधि.पी.के. | शकुन्तला |
| | स्वाती पी.राज्. | प्रियंवदा |

## सम्पन्ना पाण्डुलिपिविज्ञानविषयिणी अनुसन्धानप्रविधिविषयिणी च कार्यशाला

राष्ट्रियसंस्कृतसंस्थानस्य प्रायोजकत्वे हैदराबादे उसमानिया-वि.वि. -स्थितया संस्कृतपरिषदा (संस्थानस्य आदर्शशोधसंस्थानत्वेन परिगणितया) एकविंशतिदिनात्मिका पाण्डुलिपिविज्ञानानुसन्धानप्रविधिविषयिणी राष्ट्रिया कार्यशाला आयोजिता आसीत्। अगस्तमासस्य सप्तदशे दिनाङ्के समारब्धा इयं कार्यशाला सप्तम्बरमासस्य षष्ठदिनाङ्कं यावत् प्रावर्तत। अत्र संस्थानपरिसरस्य २१ शोधच्छात्राः, अन्यविश्वविद्यालयानां १२ शोधच्छात्राश्च सोत्साहं प्रशिक्षणं प्राप्नुवन्।

१७.८.०९तमे दिनाङ्के संस्थानकुलपतिः आचार्यः राधावल्लभ-त्रिपाठिमहोदयः कार्यक्रममेनं समुद्घाट्य पाण्डुलिप्यनुशीलनविधिम् अधिकृत्य अनुसन्धानपद्धतिमुद्दिश्य च अभिप्रेरणात्मकम् भाषणमकरोत्। श्री पी.वी.आर्.के. प्रसादः (तिरुमलतिरुपतिदेवस्थानस्य धर्मप्रचारपरिषदध्यक्षः), आचार्यः त्रिलोक-नाथगञ्जू (शारदापुरस्कारेण पुरस्कृतः काश्मीरी विद्वान्) उद्घाटनावसरे समुपस्थिताः आसन्। आचार्या पी. शशिरेखा (संस्कृतविभागाध्यक्षा,उस्मा.वि.वि.)



निर्माणाधीनं भोपालपरिसर भवनम्

उद्घाटनसत्रे आध्यक्ष्यं निरवहत्। संस्कृतपरिषदः निदेशकः डा. श्रीनिवासवरखेडिः अतिथिवर्यान् सम्मानितवान्।

सप्ताहत्रयव्यापिनी इयं कार्यशाला प्रशिक्षणदृष्ट्या एवं व्यवस्थापिता आसीत् – प्रथमसप्ताहे पाण्डुलिपिविज्ञान-विषयकव्याख्यानानि शारदालिपिशिक्षणं च, द्वितीयसप्ताहे अनुसन्धानप्रविधिबोधनं ग्रन्थलिप्यध्ययनं च, तृतीयसप्ताहे विषयप्रस्तुतिप्रविधिबोधनं नन्दिनागरीलिपिशिक्षणं चेति।

एतन्मध्ये अष्टादशे दिनाङ्के (१८.८.०९) सायं संस्कृतपरिषदः संस्थापकनिदेशकस्य आचार्यस्य आर्येन्द्रशर्मणः स्मृतौ आयोजिते कार्यक्रमे 'संस्कृतसाहित्येतिहासः-नवीना दृष्टिः' इत्यस्मिन् विषये संस्थानकुलपतिः राधावल्लभत्रिपाठिमहोदयः व्याख्यानमकरोत्।

कार्यशालायां तावत् आ.-टी.एन् गञ्जू, डा. जे.एस्.आर्. ए. प्रसादः, डा. श्रीनिवासवरखेडिः, डा. दिलीपराणा, आ. एच्.वी. नागराजरावः, डा. प्रभाकररावः, डा. अहमद-आली, श्रीनिवासः, श्रीनिधिः, श्री रङ्गिसत्यनारायणः, डा. कुमारस्वामी, कु. शिवजा, आ.का.ई. गोविन्दन्, आ.पि. शशिरेखा, आ.बी.आर्.शास्त्री, आ. टी.केशवनारायणः, डा. के.नीलकण्ठः, डा. श्रीनिवासशर्मा, डा. बी.रामरावः, श्री जनार्दनहेगडे, आ.जे.पी. डिम्री, आ.कालूरि हनुमन्तरावः, आ.वी मुरलीधरशर्मा, आ.श्रीपादसुब्रह्मण्यः, आ. कोरड-सुब्रह्मण्यः, आ. अम्बा कुलकर्णी, डा. नारायणः, डा. के. वरलक्ष्मीः, डा. विरूपाक्षजड्डीपालः, आ. लक्ष्मणमूर्तिः, आ. रव्वा श्रीहरिः, आ. नरसिंहाचार्यः, डा. शहदेवदासः, डा. सुजाता रेड्डिः, श्री फल्गुणरावः, आ.ए. रामुलुः, डा. एस्.वै. वाकङ्करः, श्री वेङ्कटकृष्णमूर्तिः, डा.वी.सुब्रह्मण्यः, डा. शीबा, डा. प्रसादजोशी, डा. तिरुमलकुलकर्णिः इत्यादयः विद्वांसः अनुसन्धातृणां मार्गदर्शनमकुर्वन्।

प्रशिक्षणकार्यशालायां अस्याः उद्यापनसत्रे ज.रा.रा.सं. विश्वविद्यालयस्य भूतपूर्वकुलपतिः आचार्यः के.वी. रामकृष्णमाचार्यमहोदयः मुख्यातिथित्वेन उपस्थाय शिक्षामधिकृत्य छात्रानुदबोधयत्। सर्वमान्याः शशिरेखा-रामुलु-प्रसाद-श्रीनिवासवरखेडि-श्रीनिवासशर्म-सुब्रह्मण्य-वरलक्ष्मी-सन्तोष-सूर्यप्रकाशप्रभृतयः कार्यक्रममेनं सफलयितुम् अयतन्त।


## जीवनव्रतिपुरस्कारेण सम्मानितः कुलपतिः राधावल्लभत्रिपाठी

महाराष्ट्रे रामटेक्स्थित-कविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालयेन राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठिमहोदयः ऐषमः **महाकवि-कालिदास-संस्कृत-जीवनव्रति-राष्ट्रियपुरस्कारेण** सम्मानितः। अयं च पुरस्कारः वैद्यनाथसंस्थापककानां स्व. वैद्य-पण्डित-श्रीरामनारायणशर्मणः स्मृत्यर्थं कालिदास-संस्कृतविश्वविद्यालयेन संस्कृतनिमित्तं स्वजीवनं समर्पितवते संस्कृतसेवकाय प्रदीयते। ऐषमः पुरस्कार-प्रदानसमारोहः १६.१२.२००९ तमे दिनाङ्के नागपुरे राजभवने प्रावर्तत। क.गु.का.सं.-विश्वविद्यालयस्य कुलगुरोः आचार्यस्य पङ्कजचान्देवर्यस्य आध्यक्ष्ये प्रवृत्ते अस्मिन् कार्यक्रमे महामहिमशालिना महाराष्ट्रराज्यपालेन श्रीयुतेन एस्.सी.जमीरमहोदयेन रा.व.त्रिपाठिमहोदयाय प्रशस्तिपत्रेण सह पञ्चाशत्सहस्ररूप्यकाणां पुरस्कारराशिः प्रदत्तः। प्राप्तपुरस्कारं कुलपतिवर्यम् अभिनन्दन्ति संस्थानपरिवारसदस्याः।



त्रिपाठिवर्याय पुरस्कारं प्रयच्छन् म.म.-महाराष्ट्रराज्यपालः एस्.सी. जमीरः। वामतः पङ्कजचान्दे अन्ये च

## पूर्वोत्तरराज्यानां संस्कृतसम्मेलनम्




रा.व. त्रिपाठी, नरेन्द्रकुमारप्रधानः, विजयबहादुरसिंहः च

राष्ट्रियसंस्कृतसंस्थानेन भारतस्य मुकुटमणौ सिक्किमराज्यस्य राजधान्यां ऐदम्प्राथम्येन ०९ तः ११ अक्टूबर २००९ पर्यन्तं त्रिदिवसीयं राष्ट्रियसंस्कृत-सम्मेलनमायोजितम्। पूर्वोत्तरराज्यानां संस्कृते अवदानम् इति विषयमधिकृत्य आयोजितस्य सम्मेलनस्य उद्घाटनसत्रे मुख्यातिथित्वेन उपस्थितः सिक्किमराज्यस्य भूतपूर्वमुख्यमन्त्री श्री एस्.एम्. लिम्बो अवोचत् यत् सर्वासां भारतीयभाषाणां मूलस्रोतः संस्कृतमेव वर्तते।

विश्वऽस्मिन् विश्वे संस्कृतेन एव सर्वादौ शान्तिसन्देशः प्रदत्त इति सिक्किमशासनस्य मानवसंसाधनविकासमन्त्रालयस्य निदेशकः श्रीरुद्रप्रसादपौडियालः स्वकीयसारगर्भितभाषणे अकथयत्। विशिष्टातिथिः श्री सी.बी. कार्की, सिक्किमशासनस्य सहकारिताविभागस्य मन्त्री नेपालीभाषायां स्वीयम् अभिप्रायं प्रकटितवान्। सः वेदगीतादिसंस्कृतशास्त्राणां महत्त्वं निरूपयन् उक्तवान् यत् कश्चन स्वीयां प्रादेशिकभाषां समृद्धां कर्तुमिच्छति चेत् तेन अवश्यं संस्कृतम् अध्येतव्यमिति। संस्थानस्य कुलपतिः आचार्यराधावल्लभत्रिपाठिवर्येण अध्यक्षीयभाषणे पूर्वोत्तरराज्यैः सह प्रगाढसम्बन्धस्थापनस्य आवश्यकता प्रतिपादिता। सिक्किमविश्वविद्यालये संस्कृतपाल्योः अध्यापनस्य व्यवस्था स्यात् इत्यपि सिक्किमशासनं अध्यक्षवर्याः न्यवेदयत्। तेनोक्तं यत् सिक्किमः भारतस्य मुकुटमणिः वर्तते। धन्यवादज्ञापनं संस्थानस्य कुलसचिवचरः श्री चन्दनसिंहकनियालः, कार्यक्रमनिर्वहणं डॉ. रत्नमोहनझाः च कृतवन्तौ।

अभिराजराजेन्द्रमिश्रप्रभृतीनां प्रथितयशसाम् आध्यक्ष्ये विविध-शैक्षिकसत्राणि प्रवृत्तानि। सङ्गीतनाटक-अकादमी द्वारा पुरस्कृतायाः श्रीमत्याः हिमालदितलिप्चायाः निर्देशने मनोहरं लिप्चानृत्यं तथा च नामबोलस्थ-राधामाधव-आदर्श-संस्कृतमहाविद्यालयच्छात्रैः मणिपुरीरासनृत्यं प्रस्तुतम्। द्वितीये दिने सिक्किमशासनस्य शिक्षामन्त्रिणः श्रीनरेन्द्रकुमारप्रधानस्य उपस्थितौ कोलकातास्थ-भाषापरिषदः निदेशकेन आचार्येण विजयबहादुरसिंहेन डा. भीमराव-अम्बेडकर-स्मृतिव्याख्यानं विहितम्। तृतीये दिने सिक्किमशासनस्य महामहिमराज्यपालस्य वाल्मीकिप्रसादसिंहस्य सान्निध्ये दिनत्रयव्यापिकार्यक्रमस्यास्य सम्पूर्तिसमारोहः अभूत्।




सिक्किमस्य राज्यपालं वाल्मीकिप्रसादसिंहं सम्मानयन् कुलपतिः, पार्श्वे रुद्रप्रसादपौडियालः च

# कुलपतेः दैनन्दिनी

| | |
|---|---|
| ५ तः ७.१०.०९ | श्रीनगरे भारतीय-बौद्धाध्ययनसङ्घस्य नवमाधिवेशनस्य उद्घाटनसत्रे सम्मानितातिथित्वम्, सम्मेलने विशिष्टव्याख्यानं च। |
| ९ तः ११.१०.०९ | 'पूर्वोत्तरराज्यानां संस्कृतं प्रति अवदानम्' इति विषयमधिकृत्य सिक्किमराज्ये गेङ्टोकनगरे सम्मेलनायोजनम्। |
| १५.१०.०९ | राष्ट्रियसंस्कृतसंस्थानस्य स्थापनादिवससमारोहावसरे फिक्की-प्रेक्षागृहे डा. राधाकृष्णन्-स्मृतिव्याख्याने अध्यक्षता। |
| १९.१०.०९ | शृङ्गेर्यां संस्थानपरिसरे नवनिर्मितप्रेक्षागृहस्य, भाषाप्रयोगशालायाः, परिसरीय-विश्वव्यापिजालपुटस्य (website) उद्घाटनम्। |
| १०.१०.०९ | संस्थानमुख्यालये पालि-प्राकृतविषयक-विकासाधिकारि-वरिष्ठानुसन्धातृ-प्रभृतीनां चयनसमितेः अध्यक्षता। |
| २५.१०.०९ | नवदेहल्याम् आचार्य-हेमचन्द्रसूरिप्रशस्तिचयनसमितेः उपवेशने समुपस्थितिः। |
| २६.१०.०९ | इलाहाबादपरिसरे पं. मण्डनमिश्रस्मृतिव्याख्यानमालाकार्यक्रमे अध्यक्षता। |
| २७.१०.०९ | देहलीविश्वविद्यालयान्तर्गते देशबन्धुमहाविद्यालये 'संस्कृतिः श्रीनगरं च' इति विषये व्याख्यानम्। |
| २९तः ३०.१०.०९ | अखिलभारतीय-कालिदाससमारोहे उद्घाटनसत्रे सारस्वतातिथित्वम्, परेद्यवि तत्र व्याख्यानं च। |
| ३.११.०९ | सम्पूर्णानन्दसंस्कृतविश्वविद्यालये प्रवृत्तस्य अखिलभारतीय-बृहत्-शास्त्रार्थसम्मेलनस्य उद्घाटनसत्रे सारस्वतातिथित्वम्। |
| ६.११.०९ | निःश्रेयस्-संस्थया आयोजिते कार्यक्रमे आचार्यो भरतमुनिः इति विषयमधिकृत्य भाषणम्। |
| ७.११.०९ | श्री.ला.ब.शा.रा.सं. विद्यापीठस्य दीक्षान्तसमारोहे समुपस्थितिः। तत्र च आयोजिते कविसमवाये भागग्रहणम्। |
| ९.११.०९ | संस्थानमुख्यालये परिसरप्राचार्याणाम् उपवेशने आध्यक्ष्यम्। |
| १० तः १२.११.०९ | नवदेहल्यां संस्थानेन आयोजिते कौमुदीमहोत्सवे आध्यक्ष्यम्। |
| १७.११.०९ | संस्थानमुख्यालये, भारतीय-ज्ञानव्यवस्थाम् अधिकृत्य कार्यं कुर्वतां गणस्य उपवेशने आध्यक्ष्यम्। |
| १८.११.०९ | तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य कार्यपरिषदः उपवेशने समुपस्थितिः। |
| २१.११.०९ | देहलीस्थ-राहुल-सांङ्कृत्यायन-न्यासेन आयोजितायाः राष्ट्रियसङ्गोष्ठ्याः उद्घाटनव्याख्यानम्। |
| २२.११.०९ | बेङ्गलूरुनगरस्थेन पू.प्र. संशोधनमन्दिरेण आयोजितायां 'संस्कृतवाङ्मये मनोविज्ञानम्' इति विषयिण्यां सङ्गोष्ठ्यां भाषणम्। |
| २६.११.०९ | संस्थानस्य प्रकाशनसमितेरुपवेशने आध्यक्ष्यम्। |
| २७तः २९.११.०९ | जयपुरपरिसरे युवमहोत्सवे अध्यक्षता। |
| ३०.११.०९ तः२.१२.०९ | जयपुरपरिसरे अखिलभारतीय-शास्त्रीयस्पर्धा-कार्यक्रमे आध्यक्ष्यम्। |
| १.१२.०९ | मुम्बई-परिसरभवननिर्माणविषये मुख्यालये आयोजिते परिचिन्तनोपवेशने आध्यक्ष्यम्। |
| २.१२.०९ | जयपुरपरिसरे अखिलभारतीयशास्त्रीयस्पर्धायाः सम्पूर्तिसमारोहे अध्यक्षता। |
| ३.१२.०९ | सागरस्थे डा. ह.सिं. गौरविश्वविद्यालये नाट्यशास्त्रविषयिण्याः राष्ट्रियसङ्गोष्ठ्याः उद्घाटनभाषणम्। |
| ७.१२.०९ | देहल्यां दयालसिंह-महाविद्यालयेन आयोजितायां सङ्गोष्ठ्यां संस्कृतकाव्यशास्त्रं सौन्दर्यशास्त्रं चेति विषयमधिकृत्य भाषणम्। |
| ८.१२.०९ | नवदेहल्यां टागोरगार्डन्स्थित-केन्द्रीयविद्यालयस्य प्रबन्धमण्डलस्य उपवेशने अध्यक्षता। भारतीय-अनुवादपरिषदः दीक्षान्तसमारोहे दीक्षान्तभाषणम्। |
| ९.१२.०९ | विश्वसंस्कृतसम्मेलनायोजनविषये चिन्तनाय संस्थानमुख्यालये प्रवृत्ते उपवेशने समुपस्थितिः। |
| १०.१२.०९ | नवदेहल्यां भारती-महाविद्यालयेन आयोजिते कालिदासमहोत्सवे सम्मानितातिथित्वम्। |
| ११.१२.०९ | सीतापुरस्थेन मा-आनन्दमयी-पौराणिक-वैदिकाध्ययनशोधसंस्थानेन 'श्रीमद्भागवतमहापुराणतत्त्वविमर्शः' इति विषयमधिकृत्य रा.सं.संस्थानस्य सहयोगेन आयोजितकार्यशालायाम् अध्यक्षता। |
| १२.१२.०९ | लखनऊ-परिसरस्य वार्षिकोत्सवे, संस्कृतनाटकोत्सवे च अध्यक्षता। |
| १४तः १५.१२.०९ | हरिद्वारे गुरुकुलकाङ्गडी विश्वविद्यालये वि.वि.अ. आयोगस्य पुनरीक्षणसमितेः उपवेशने समुपस्थितिः। |
| १५.१२.०९ | क.का. संस्कृतविश्वविद्यालयेन प्रदत्तेन जीवनव्रतिपुरस्कारेण म.म. महाराष्ट्रराज्यपालेन सम्मानितः। |
| १९.१२.०९ | हरिद्वारे उत्तराखण्डविश्वविद्यालयस्य कार्यपरिषदः उपवेशने उपस्थितिः। |
| २०.१२.०९ | भोगीलाल-लेहरचन्द-प्राच्यविद्यासंस्थया राष्ट्रियपाण्डुलिपिमिशन् इत्यस्याः सहयोगेन समायोजितायां पाण्डुलिपिविज्ञानविषयक-कार्यशालायां मुख्यातिथित्वम्। |
| २२.१२.०९ | भारतीयविश्वविद्यालयसङ्घभवने नवदेहल्यां प्रवृत्ते अन्वेषणसमितेः उपवेशने उपस्थितिः। |
| २९.१२.०९ | संस्थानशोधमण्डलस्य उपवेशने अध्यक्षता। |

## अखिलभारतीयशास्त्रीयस्पर्धा



उद्यापनसत्रे वेदिकासीनाः अर्कनाथचौधरी, राजेन्द्रमिश्रः, रामकरणशर्मा, रा.देवनाथः, सुदेशशर्मा, भाषमाणः कुलपतिः रा.व. त्रिपाठी

ऐषमः अखिलभारतीयशास्त्रीयस्पर्धाः संस्थानस्य जयपुरपरिसरे समायोजिता ३०.११.०९ दिनाङ्के समारब्धा ४७तमाः अखिलभारतीयाः शास्त्रीयस्पर्धाः २.१२.०९ दिनाङ्कं यावत् प्राचलन्। एतासु स्पर्धासु विविधराज्येभ्यः समायाताः उपद्विशतं स्पर्धालवः पारम्परिक- संस्कृतच्छात्राः भागमवहन्। विविधविषयेषु निर्दिष्टावधेः पूर्वं प्रदत्तेषु विषयेषु स्पर्धालूनां भाषणम्, श्लोकरचनासामर्थ्यपरीक्षिका समस्यापूर्तिः, अन्त्याक्षरी, प्राचीनपरीक्षाप्रकाररूपाः शलाकापरीक्षाः च शास्त्राभिमानिनां तत्संरक्षणपराणां च प्रशंसायै मोदाय च अकल्पन्त। शास्त्रीयस्पर्धानाम् उद्घाटनावसरे मुख्यातिथिरूपेण आचार्यः रामकरणशर्मा (अध्यक्षचरः, अन्ताराष्ट्रियसंस्कृतविद्यासमवायः), अध्यक्षरूपेण आचार्यः राधावल्लभत्रिपाठी (कुलपतिः, रा.सं. संस्थानम्), संस्थानकुलसचिवः आचार्यः रा. देवनाथः, आयोजकपरिसरप्राचार्यः अर्कनाथचौधरी, परिसरीयसहाचार्यः डा. वै. एस्.रमेशः च वेदिकामलङ्कृतवन्तः। अष्टादश-राज्येभ्यः समागतैः स्वस्वगणमार्गदर्शकैः सह समुपस्थितेभ्यः प्रतिस्पर्धिभ्यः, पुरप्रमुखेभ्यः विद्वद्भ्यः सभ्येभ्यश्च परिसरप्राचार्यः स्वागतार्पणमकरोत्। आचार्यरामकरणशर्ममहोदयः 'पारम्परिकशास्त्राणां तदाधारितप्रतिभायाश्च विकासाय पूर्वं भारतशासनेन समारब्धः अखिलभारतीयः शास्त्रीयभाषणस्पर्धाकार्यक्रमः ४६ वर्षाणि यावत् प्रतिवर्षं निरन्तरं प्राचलत्, अस्मिन्नपि वर्षे प्रवर्तते इति आनन्दम् प्राकटयत्। आचार्यः कुलपतिः रा.व.त्रिपाठिमहोदयः 'अस्माद् वर्षादारभ्य त्रिषु अतिरिक्तविषयेषु (ज्योतिष-पुराणेतिहास-वेदान्तशास्त्रेषु) शलाकापरीक्षा आयोज्यते, पुरस्कारराशिरपि संवर्धितः' इति उत्साहवर्धकं विषयं समसूचयत्। कुलसचिवः आचार्यः रामानुजदेवनाथ कार्यक्रमस्य वैशिष्ट्यकथनपुरस्सरं दिनत्रयात्मककार्यक्रमस्य स्वरूपं निर्दिश्य उद्घाटनकार्यक्रमे उपस्थितेभ्यः नमोभणितिं समार्पयत्, सर्वान् सर्वेषु कार्यक्रमेषु समुपस्थातुं प्रैरयत् च।

३०.११.०९-अपराह्णतः २.१२.०९-मध्याह्नं यावत् विविधाः स्पर्धाः समभवन्। एतन्मध्ये राजस्थानराज्यपालस्य निधनवार्तां श्रुत्वा ०१.१२.०९ तमे दिनाङ्के परिसरे उपस्थितैः स्पर्धाभिभिः आयोजकैश्च दिवङ्गतस्य आत्मशान्त्ये शोकसभापुरस्सरं मौनमाचरितम्। ०२.१२.०९तमे दिनाङ्के मध्याह्ने १२.०० वादनतः पुरस्कारवितरणसमारोहः प्रवृत्तः। तत्र समुपस्थितः आचार्यः रामकरणशर्ममहोदयः अवदत् यत् 'दिनत्रयं यावत् प्रवृत्तस्पर्धासु छात्रैः प्रदर्शितां प्रतिभां वीक्ष्य संस्कृतस्य उज्ज्वलभविष्यस्य प्रबला आशा मम मनसि समुत्पन्ना' इति।

अध्यक्षः राधावल्लभत्रिपाठिमहोदयः शलाका-अन्त्याक्षर्यादि-विविधस्पर्धासु छात्रैः कृतं स्फूर्तियुतं भागग्रहणम् अभ्यनन्दत्। एतदवसरे परिसराध्यापकानां विविधानि प्रकाशनानि लोकायार्वितानि। आचार्यः अभिराजराजेन्द्रमिश्रः प्रकाशितग्रन्थानुद्दिश्य संस्थानकार्यवैखरीमुद्दिश्य च सम्भाष्य कुलपतिमहोदयम् अभिनन्दितवान्।

स्पर्धासु विजयिभ्यः स्वर्ण-रजत-कांस्यपदकादि-पुरस्काराः प्रदत्ताः। सर्वासु स्पर्धासु अत्यधिकाङ्कान् प्राप्य उत्तरप्रदेशतः समागतः स्पर्धालुगणः विजयवैजयन्तीम् अलभत। परिसरप्राचार्यः अर्कनाथचौधरीमहोदयः कार्यक्रमायोजने विविधरीत्या सहकृतवतः सर्वान् कृतज्ञतापूर्वकं संस्मृत्य धन्यवादं व्याहरत्। परिसरीयाचार्यः सुदेशकुमारशर्मा पुरस्कारवितरणसमारोहे सभां सञ्चालितवान्।

### पञ्चदशस्य विश्वसंस्कृतसम्मेलनस्य प्रथमा सूचना प्रकटिता

विदितमेवेदं भवतां यत् पञ्चदशं विश्वसंस्कृतसम्मेलनं भारते नवदेहल्याम् आयोजयितुं सदवसरः राष्ट्रियसंस्कृतसंस्थानेन प्राप्तः इति। २०१२तमे वर्षे आयोजनीयस्य एतस्य सम्मेलनस्य पूर्वसिद्धताक्रमे स्थानीयायोजनसमितेः एका चिन्तनगोष्ठी संस्थानमुख्यालये ९.१२.०९तमे दिनाङ्के संस्थानकुलपतेः राधावल्लभत्रिपाठिवर्यस्य आध्यक्ष्ये प्रवृत्ता। तत्र अन्ताराष्ट्रिय-संस्कृतविद्यासमवायस्य भूतपूर्वः अध्यक्षः आचार्यः रामकरणशर्मा, अन्ताराष्ट्रिय-संस्कृतविद्यासमवायस्य वर्तमानाध्यक्षः आचार्यः वेम्पटि कुटुम्बशास्त्री, श्रीलालबहादुरशास्त्रि-रा.सं. विद्यापीठस्य कुलपतिः आचार्यः वाचस्पति-उपाध्यायः, मानवसंसाधनविकासमन्त्रालयस्य अधिकारी श्री सिसोदिया, आचार्यः अशोक-अकलूजकरः, आचार्यः रमाकान्तशुक्लः, आचार्यः एस्.पी. नारङ्गः, संस्थानकुलसचिवः आचार्यः रामानुजदेवनाथः, डा. शुक्लामुखर्जी, कू. वेङ्कटेशमूर्तिः च उपस्थिता आसन्।

पञ्चदशविश्वसंस्कृतसम्मेलनस्य स्वरूप-विषयविभाग-शोधपत्रप्रस्तुतेः आवेदनादि-विषये प्रथमसूचनारूपम् उद्घोषणं विश्वव्यापिजालपुटे www.sanskrit.nic.in इत्यत्र द्रष्टुमर्हन्ति।

अभिनन्दनम्

## अखिलभारतीय-भाषणस्पर्धासु विजयिनः

( प्रथम-द्वितीय-तृतीय-क्रमेण )

**व्याकरणे**

| विजयिनः नाम | संस्था-नाम |
|---|---|
| अशोककुमारमिश्रः | सम्पू.सं.वि.वि. वाराणसी |
| राहुलशर्मा | रा.सं.सं. भोपालपरिसरः |
| विमलरक्षितः | विवेकानन्द-वि.वि. बेलूरुमठः |

**साहित्ये**

| | |
|---|---|
| आरती शर्मा | रा.सं.वि., तिरुपतिः |
| प्रियङ्का गर्ग | रा.सं.सं., जयपुरपरिसरः |
| जयकण्ठः | मद्रास-सं.म.वि, मैलापुर |
| चन्द्रप्रकाशः उप्रेती | श्रीभगवानदास-आ.सं.महा., हरिद्वारम् |

**न्याये**

| | |
|---|---|
| राजीवलोचनशर्मा | काशी-हिन्दू वि.वि. |
| गानमूर्तिः के | रा.सं.सं. राजीवगान्धीपसिरः, शृङ्गेरी |
| मिहिररञ्जनपण्डा | रा.सं. विद्यापीठम्, तिरुपतिः |

**सांख्ययोगे**

| | |
|---|---|
| भास्करभट्टः जोषी | रा.सं. विद्यापीठम्, तिरुपतिः |
| शम्भुनाथभट्टः | श्रीचामराजेन्द्र सं.महा. पा.शा. बेङ्गलूरु |
| निलमसुरेन्द्रप्रसादरावल | श्रीसोमनाथ-सं.वि.वि. |

**मीमांसायां**

| | |
|---|---|
| दुबे अङ्गदकुमारः ए. | श्रीदर्शनम् सं.महा. छारोड़ी |
| गुरुराजकलकुरुः एम्. | म.सं.म.वि. मैलापुर |
| सरोजिनी पाणिग्रही | रा.सं.सं., सदाशिवपरिसरः, पुरी |
| एम्. वेङ्कटनारायणः | रा.सं.वि., तिरुपतिः |

**वेदान्ते**

| | |
|---|---|
| केशवपोखरेलः | सम्पूर्णानन्द-सं.वि.वि. |
| विवेककर्मकारः | विवेकानन्द-वि.वि., बेलूरमठः |
| सूर्यनारायणमिश्रः | श्रीसदाशिवपरिसरः, पुरी |
| रामकृष्णभट्टः | राजीवगान्धीपरिसर,शृङ्गेरी |
| वी.बाला जी | श्रीअहो.-आ.सं.महा., मधुरान्तकम् |

**धर्मशास्त्रे**

| | |
|---|---|
| नीरजकुमारभार्गवः | काशीहिन्दू-वि.वि., वाराणसी |
| एस्.कार्तिकः | श्रीअहोबिलमठ-आ.सं.महा.मधुरान्तकम् |
| श्रीधरः जी.भट्टः | राजीवगान्धीपरिसरः, शृङ्गेरी |

**ज्योतिषे**

| | |
|---|---|
| मधुसूदनमिश्रः | काशीहिन्दू-वि.वि., वाराणसी |
| वासुदेवजोयिस् | एस्.एम्.एस्.पि.सं.म.पा., उडुपि |
| गणेशः के. | मद्रास-सं.महा. मैलापुर, चेन्नई |

## शलाकापरीक्षासु पुरस्कारभाजः

**काव्ये**

| | |
|---|---|
| सन्दीपकुमारपाठकः | श्रीमती भा.ट्रस्ट्.आ.सं.महा., मिर्जापुरम् |
| भट्टजयकुमारः जे. | श्रीवरतन्तु सं.महा., अहमदाबाद् |
| विश्वजित् महाराणा | राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |

**साहित्ये**

| | |
|---|---|
| सि.एच्. नागराजः | रा.सं.विद्यापीठम्, तिरुपतिः |
| श्रीनीरजकुमारीत्रिपाठी | सं.सं.वि.वि., वाराणसी |
| जितेन्द्रियकुमारमिश्रः | श्रीजगन्नाथ-सं.वि.वि., पुरी |
| अङ्केश आर्यः | आर्षगुरुकुल-महावि. होशङ्गाबाद् |

**न्याये**

| | |
|---|---|
| छविलाल-न्यौपाने | श्री.ला.ब.शा.रा.सं.वि., नवदेहली |
| कृत्तिका पि.राव् | म.सि.प्र. संस्कृतमहापाठशाला, उडुपि |
| एस्. बद्रीनाथः | श्रीअहोबिलमआदर्श-सं.म.वि. मधुरान्तकम् |

**सि. ज्योतिषे**

| | |
|---|---|
| श्री मधुसूदनमिश्रः | का.हिन्दू वि.वि. वाराणसी |
| विनोदकुमारशर्मा | रा.सं.सं. जयपुरपरिसरः |
| एस्. सोमास्कन्दः | मद्रास् सं.महा.वि., मैलापुरम्, चैन्नै |

**वेदान्ते**

| | |
|---|---|
| जोषी चिन्तनकु.दि.भाई | श्रीदर्शनं-संस्कृतमहाविद्यालयः, छारोडी |
| टि. सीतारामशर्मा | रा.सं.सं., राजीवगान्धीपरिसरः,शृङ्गेरी |
| पी.वी. गुहकृष्णः | मद्रास-संस्कृतमहाविद्यालयः |

**व्याकरणे**

| | |
|---|---|
| अर्चनाकारन्त् | रा.सं.सं., राजीवगान्धीपरिसरः |
| नीरजकुमारभार्गवः | का.हिन्दू वि.वि., उ.प्र. |
| जी. यशस्वी | रा.सं.वि.पी., तिरुपतिः |
| राहुलशर्मा | रा.सं.सं., भोपालपरिसरः |

विकसति नवप्रतिभा

**विशेषपुरस्कारः**

| | |
|---|---|
| रामकुमारशर्मा | जयपुरपरिसरः |
| भुवनेश्वरी | जयपुरपरिसरः |

**पुराणोतिहासे**

| | |
|---|---|
| सी.हरिहरः | मद्रास्-सं.महा.वि. मैलापुर, चैन्ने |
| जोषी भरतकु.जि.भाई | श्रीब्रह्मर्षि-सं.म.वि., नडियार |
| लक्ष्मी पोखेल् | त्रिङ्के सं.म.वि., सिक्किम् |

**अष्टाध्याय्यां**

| | |
|---|---|
| कु. किरण | दयानन्दकन्यागुरुकुलमहा. चोटीपुरा |
| गणेशदेवआर्यः | के.जे.सौमैया-संस्कृत.वि.पी. मुम्बई-परिसर |
| अनिलदेवआर्यः | रा.सं.सं., भोपालपरिसरः |
| अमरनाथशर्मा | रा.सं.सं. राजीवगांधीपरिसर,शृङ्गेरी |

**अमरकोषे**

| | |
|---|---|
| भट्टः जगदीशकुमार-भानुशङ्करभाई | श्रीदर्शनम् सं.म., अहमदाबाद् |
| शान्तनू आयाचितः | राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः |
| श्रीश्यामसुन्दरः | रा.सं.सं., लखनऊ परिसर |
| आर्.स्वातीशः | श्री अहोबिलमठ आ.सं.महा. मधुरान्तकम् |

**समस्यापूर्तौ**

| | |
|---|---|
| श्रीहेमचन्द्रबेलवालः | श्रीभगवानदास-आ.स.महा. हरिद्वारम् |
| विवेकर्मकारः | रामकृष्णमिशन्-विवे.-वि.वि., बेलुरमठः |
| महेशभट्टः आर् | एस्.एम्.एस्.पि.सं.म.पा. उडुपि |

**अन्याक्षर्यां**

| | |
|---|---|
| सुब्रह्मण्य-ग.भट्टः | म.सि.प्र.सं.म.पा उडुपि, कर्णाटकम् |
| ति.लवकुमारः | मद्रपुरी सं. कलाशाला, तमिलनाडु |
| ए.जयपणिकण्ठः | मद्रपुरी सं. कलाशाला, तमिलनाडु |

राष्ट्रियसंस्कृतसंस्थानेन जयपुरपरिसरे ३१.११.०९ तः ०२.१२.०९ पर्यन्तं समायोजितायामखिल-भारतीयशास्त्रीयवाक्स्पर्धायां लक्ष्मणपुरीपरिसरस्य प्रातिनिध्ये उत्तरप्रदेशोत्तराखण्डयोः संयुक्तदलेन विजयवैजयन्ती समुपलब्धा। दलेनानेनाहत्य दश स्वर्णपदकानि, एकं रजतपदकं, द्वे च कांस्यपदके प्राप्य विजयवैजयन्ती लब्धा। तत्र च किरणः, नीरजकुमारभार्गवः, राजीवलोचनशर्मा, केशवपोखरेलः, अशोकमिश्रः, मधुसूदनमिश्रः, हेमचन्द्रः, संदीपपाठकः इत्येभिः स्वर्णपदकानि, नीरजत्रिपाठी इत्येनन रजतपदकं, चन्द्रप्रकाशउप्रेती, श्यामसुन्दरः इत्येताभ्यां च कांस्यपदके अवाप्य वैजयन्ती प्राप्ता। संस्थानकुलपतिः दलप्रभारिणे कुलदीपशर्मणे विजयप्रमाणपत्रं वैजयन्तीं च प्रायच्छत्।



अ.भा. शास्त्रीयस्पर्धासु विजयवैजयन्त्या पुरस्कृतः उत्तरप्रदेश-उत्तराखण्डराज्ययोः छात्रगणः

## पालिविषयिणी अन्ताराष्ट्रिया सङ्गोष्ठी

राष्ट्रियसंस्कृतसंस्थानेन २२.११.०९ तः २४.११.०९ पर्यन्तं नवदेहल्यां विज्ञानभवने 'बौद्धधर्मस्य सार्वभौमः सन्देशः' इति विषयमधिकृत्य त्रिदिवसीया अन्ताराष्ट्रिया पालिसङ्गोष्ठी आयोजिता। भिक्षुसङ्घेन कृतया प्रार्थनया, समाहूतविद्वद्भिः कृतेन ज्योतिप्रज्वालनेन च समारब्धायामस्यां सङ्गोष्ठ्यां भारतशासनस्य मानवसंसाधन-विकासमन्त्रालये कार्यरता संयुक्तसचिवा (भाषायाः) डा. अनीता भटनागरजैनवर्या स्वागतभाषणम् अकरोत्। भाषणावसरे तया बुद्धस्य शिक्षणमुद्दिश्य, बौद्धसाहित्ये विद्यमानानां मानवीयमूल्यानां विषये च विचारः प्रस्तुतः। कार्यक्रमे सम्मानितातिथिरूपेण आमन्त्रितः आचार्यः गयाचरणत्रिपाठी गौतमबुद्धप्रतिपादितम् अष्टाङ्गमार्गं व्यवृणोत्। बेङ्काकस्थ-शिल्पाकार्न-विश्वविद्यालयस्य संस्कृतविभागात् समागतः आचार्यः चिरापत्-प्रपण्डविद्यः थाईलेण्डदेशे बौद्धदर्शनप्रभावः इति विषयम् अधिकृत्य विवरणं प्रास्तौत्। सभायाः आध्यक्ष्यं निर्वहन् भारतशासनस्य शिक्षासचिवः अवदत् यत् भारतीयप्राचीनवाङ्मये संस्कृते, बौद्धदर्शने च उपलभ्यमानानि मूल्यानि संरक्षणीयानि, तानि अवगन्तव्यानि चेति। संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठिमहोदयः एशियाखण्डस्य भाषाणां भाषावैज्ञानिकं सांस्कृतिकं च सम्बन्धं, तत्र च पालिभाषावैशिष्ट्यं संस्कृतपालिभाषयोः सम्बधं च विवृतवान्। सङ्गोष्ठ्याः अङ्गतया आयोजितपुस्तकप्रदर्शिनीं, पालिसूक्तिसङ्ग्रहप्रदर्शिनीं च श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिः आचार्यः वाचस्पति-उपाध्यायमहोदयः आचार्यस्य रामकरणशर्ममहोदयस्य सम्मानितोपस्थितौ समुदघाटयत्।

सङ्गोष्ठ्याः उद्घाटनसत्रे कार्यक्रमसञ्चालनं डा. सोमेशमिश्रेण, डा. इन्दुजैन इत्यनया च कृतम्। तत्पश्चात् तृतीयदिनं यावत् विभिन्नसत्रेषु पालिभाषायाः, बौद्धदर्शनस्य बौद्धसंस्कृतेश्च विविधपक्षानवलम्ब्य विदुषामाध्यक्ष्ये, बहुभिर्विद्वद्भिः स्वीयानि शोधपत्राणि प्रस्तुतानि। २४.९.०९तमे दिनाङ्के अपराह्णे अस्याः सङ्गोष्ठ्याः सम्पूर्तिसमारोहः सम्पन्नः यत्र दिगन्तव्याप्तकीर्तिः राष्ट्रपतिसम्मानितः आचार्यः लोकेशचन्द्रः विशेषरूपेण समाहूत आसीत्। भागग्रहिणाम् अनुभवकथनात् परं भाषमाणः लोकेशचन्द्रमहोदयः भारतीयसंस्कृतौ स्नेह-दया-शान्तिसौहार्दादि-मानवीयमूल्यानां महत्त्वं, वेददर्शनशास्त्रादिषु तद्विषयकोद्बोधनं, बौद्धपरम्परायां तादृशगुणानां व्याख्यानम्, बुद्धोपदेशानाम् अद्यत्वे उपादेयता, बौद्धोपदेशानाम् उपनिषत्तत्त्वानां च सम्बन्धः इत्यादिविषये विस्तरेण स्वीयान् विचारान् व्यक्तीकृतवान्। तेन अभिप्रेतं यत् 'पालिसाहित्यिकांशानां त्रिपिटकानां च संस्कृतानुवादः स्यात् येन अधिकजनाः तत्पठितुं शक्नुयुः' इति। तस्मिन्नेवावसरे आचार्येण प्रपण्डविद्यमहोदयेनापि भाषितम्। 'भारतीयोपनिषदां विषये आदरः अस्मद्देशे (थाईलेण्डदेशे) वर्तते, उपनिषत्तत्त्वसाम्यं बहुत्र बुद्धोपदेशेषु अवलोक्यते' इति तेनोक्तम्।


अध्यक्षभाषणं कुर्वन्
भारतशासनस्यशिक्षासचिवः रामेश्वरपाल-अग्रवालः

अन्ते समारोपभाषणं कुर्वाणः कुलपतिः समभिप्रेतवान् यत् पालिसाहित्यस्य त्रिपिटकानां च संस्कृतभावानुवादेन (संस्कृतच्छायया) साकं प्रकाशनं विचारप्रसारदृष्ट्या लाभाय स्यात् इति। अस्मिन् विषये यथोचितं निर्णीय अग्रिमं पदं निधीयते इति च तेनोक्तम्। धन्यवादार्पणेन राष्ट्रगानेन च सभा सम्पन्ना।

## जयपुरे युवमहोत्सवः




युवमहोत्सवारम्भे उपस्थिताः शु.मुखर्जी, पं. नवलकिशोरशर्मा, रा.व. त्रिपाठी, रा.देवनाथः, अर्कनाथचौधरी

राष्ट्रियसंस्कृतसंस्थानेन नवम्बर २७तम-दिनाङ्कात् २९ दिनाङ्कं यावत् अन्तःपरिसरीयः संस्कृतयुवमहोत्सवः, समायोजितः। बृहत्तमेन संस्कृतविश्वविद्यालयेन रा.सं.संस्थानेन जयपुरपरिसरे समायोजिते अस्मिन् महोत्सवे देशस्य विभिन्नराज्यस्थितेभ्यः परिसरेभ्यः समागताः षट्शतं संस्थानपरिसरच्छात्राः शैक्षिक-सांस्कृतिक-क्रीडास्पर्धासु भागमवहन्। कार्यक्रमोऽयं गुजरातस्य भूतपूर्वराज्यपालस्य पं. श्रीनवलकिशोरशर्ममहोदयस्य मुख्यातिथित्वे, संस्थानकुलपतेः आचार्यराधावल्लभत्रिपाठिवर्यस्य आध्यक्ष्ये च सम्पन्नः। परिसरप्राचार्यः अर्कनाथचौधरीमहोदयः सर्वेभ्यः स्वागतं व्याहरत्। कुलसचिवः आचार्यः रामानुजदेवनाथः धन्यवादं व्याहरत्। विविधासु स्पर्धासु भागं गृह्णतां प्रतिभया जयपुरपौराः समाकृष्टाः अभवन्। युवमहोत्सवस्पर्धासु सर्वाधिकाङ्कान् सम्पाद्य शृङ्गेरीपरिसरस्य छात्रगणः युववैजयन्तीं प्राप्य समेषामभिनन्दनपात्रम् अभवत्। २९.११.०९ तमे दिनाङ्के प्रवृत्ते युवमहोत्सवस्य सम्पूर्तिसमारोहे समुपस्थिता राष्ट्रियमहिलायोगस्य अध्यक्षा डा. गिरिजाव्यासमहोदया संस्कृतस्य सर्वजनस्वीकार्यताम्, अनिवार्यतां च संवर्ण्य युवजनचित्तेषु विद्यमानं संस्कृताभिमानं समुद्दीपितवती। समारोहे भाषमाणः जयपुरस्थः लोकसभासदस्यः डा. महेशजोशी संस्कृतसम्बद्धविकासकार्याणि निर्बाधं प्रवर्तेरन् इति शुभाशंसनमकरोत्।

अध्यक्षभाषणं कुर्वन् कुलपतिः अभिप्रेतवान् यत् ईदृग्विधाः कार्यक्रमाः छात्राणां प्रतिभाविकासाय कल्पन्ते इति। अपि च तेनोक्तं - प्रतिवर्षं प्राप्तानुभवस्याधारेण एतादृशायोजनेषु छात्रहितदृष्ट्या अपेक्षितं परिष्कारं आनयेम इति।

आरम्भे कुलसचिवः समुपस्थितेभ्यः मान्येभ्यः स्वागतं व्याहृत्य संस्थानस्य क्रियाकलापान् व्यवृणोत्। जयपुरपरिसरप्राचार्यस्य नेतृत्वे परिसरीयाध्यापकानां सहयोगेन डा. शुक्लामुखर्ज्या संयोजितस्यास्य कार्यक्रमस्य समारोपसभां डा. वै.एस्.रमेशमहोदयः समचालयत्। परिसरप्राचार्यः कृतज्ञतावचनानि न्यवेदयत्।



योगासनं प्रदर्शयन्तः छात्राः



उद्घाटनसत्रे भाषमाणः पं. नवलकिशोरशर्मा



युववैजयन्तीं प्राप्तवन्तः शृङ्गेरीपरिसरच्छात्राः

### कुलसचिव-कार्यभारं धरति आचार्यः रामानुजदेवनाथः

शृङ्गेरीस्थ-राजीवगान्धीपरिसरस्य प्राचार्यः रामानुजदेवनाथवर्यः अक्टूबर-मासारम्भत एव रा.सं.संस्थानस्य कुलसचिवप्रभारं वहति। कुलपतेः राधावल्लभ-त्रिपाठिवर्यस्य नेतृत्वे रामानुजदेवनाथस्य साचिव्ये च संस्थानस्य स्यादुत्कर्षः इत्याशास्ते संस्थानपरिवारः।

### सेवाकालं पूरितवन्तः कर्मचारिणः

| नाम | संस्थानसेवायां प्रवेशतिथिः | सेवाविरतितिथिः | सेवाविरमणकाले पदम् |
|---|---|---|---|
| श्री चन्दनसिंहकनियालः | १-२-१९७२ | ३०-९-०९ | उपकुलसचिवः (वित्तम्) |
| श्री राजेन्द्रसिंह बिजि | १५-११-१९७३ | ३०-९-०९ | कार्या० सहायकः |
| श्री अशोकचौधरी | ३१-३-१९७६ | ३०-९-०९ | सहायकग्रन्थपालः |

## युवमहोत्सवे प्रथम-द्वितीय-तृतीय-क्रमेण पुरस्कारं प्राप्तवतां नामानि

### शैक्षिकस्पर्धासु

सुभाषितकण्ठपाठे–नागराजः, अभिषेकशर्मा, प्रभातकुमारनायकः

वादविवादे–नागराजः, कुमुदाराव्, परमेशशर्मा

साहित्यरचनायाम्–हेमन्तसिंहयादवः, विश्वनाथहेगडे, चिन्तनकुमारदवे

प्रश्नमञ्चे–सौम्या के.आर्.-नवीनभट्टौ, (जयेशव्यास-मनमोहनशर्माणौ कपिलकुमारभार्गव-प्रदीपकुमारदूबे च), एकतापाण्डेय-नारायणदत्तमिश्रौ

### कलास्पर्धासु

भित्तिपत्रके–ज्योतिबाला, सुधीरकुमारजैनः, सुकन्यासेनापतिः

रङ्गवल्लीस्पर्धायाम्–सुनीता एम्.आर्., ज्योत्स्ना दे, शान्तलाराव्-प्रतीक्षासोनी च

आशुचित्रणे–विनयः एच्.वि., नर्मदा एम्.एम्., सुधीरकुमारजैनः

शास्त्रीयगायने–विनायकः एस्.भट्टः, सङ्गीतामहाराणा, यज्ञदत्तशुक्लः

शास्त्रीयवादने–रमानन्दनशर्मा, अभिशेखरशर्मा, साकेतकुमारशर्मा

शास्त्रीयनृत्ये–नीतू टी.सी., अश्विनीहेगडे, जिनु ए.के.

संस्कृतगीते–हरेकृष्णताण्डी, सङ्गीतामहाराणा, प्रभातकुमारपण्डा-राजेशउपाध्यायौ

एकपात्राभिनये–रवीशहेगडे, निपिनः पी.यू., पुनीतसंज्ञा

व्यङ्ग्यचित्रणे–सुधीरकुमारजैनः, यदुकृष्णन्, महावीरशर्मा

### क्रीडास्पर्धासु

१०० मीटरधावने (पु.)–दिनेशकुमारः, भूपेन्द्रसिंहः, सुभाषचन्द्रदासः

१०० मीटरधावने (स्त्री.)–शशिकलाभट्ट, आशागोपाल, सरोजिनीतराई

२०० मीटरधावने (पु.)–भूपेन्द्रसिंहः, दिनेशकुमारः, सुभाषचन्द्रदासः

२०० मीटरधावने (स्त्री.)–सरोजिनीतराई, वेदाञ्जलिबाग, मीनागोस्वामी

४०० मीटरधावने (पु.)–राजेन्द्रकुमारशर्मा, दिनेशकुमारः, भूपेन्द्रसिंहः

४०० मीटरधावने (स्त्री.)–ज्योतिसिहः, लक्ष्मीप्रियामानसिंहः, मीनागोस्वामी

८०० मीटरधावने (पु.)–दिनेशकुमारः, प्रदीपकुमारः, रोहतासः

१५०० मीटरधावने (पु.)–अरविन्दसिंहचूडावतः, प्रदीपकुमारः, रोहतासः

दीर्घकूर्दने (पु.)–भूपेन्द्रसिंहः, विक्रमकिशनः, चिन्मयकुमारबेहरा-लीलाधरौ

दीर्घकूर्दने (स्त्री.)–शशिकलाभट्ट, ज्योतिसिंहः, रेणुका-लक्ष्मीप्रियामानसिंहे

उच्चकूर्दने (पु.)–राणीशः सी.के., निरञ्जनभट्टः, भूपेन्द्रसिंहः

उच्चकूर्दने (स्त्री.)–पूर्णिमा एच्.एस्., अश्वति पी.एम्., रेणुका

गोलकक्षेपणे (पु.)–राजकुमारः, हरीशकुमारः, विनायकः एस्.भट्टः

गोलकक्षेपणे (स्त्री.)–रीतूकुमारी, मीनागोस्वामी, झरणादास

चक्रक्षेपणे (पु.)–दीपकमञ्जुनाथहेगडे, लखनलालमाली, राधामोहनशर्मा

चक्रक्षेपणे (स्त्री.)–प्रकाशिनी मिश्रा, मीनागोस्वामी, शशिकलाभट्

कुन्तक्षेपणे (पु.)–रमेशः सी.के., शैतानरामः, धीरजकुमारः

बैडमिण्टनक्रीडायाम् (पु.)–प्रवीणकुमार-अरुणाकुमारौ, कामेश्वर-राकेशकुमारौ

बैडमिण्टनक्रीडायाम् (स्त्री.)–कविता उपाध्याया-दिव्याजोशी च, शारदाकुमारी-रीना च

हस्तकन्दुके (प्र.)– (गरली) विपिनः, अमितः, अतुलदत्तः, सन्दीपकुमारः, अश्विनी, रेशम, सुमितः, सुमितः (शा.द्वि)

हस्तकन्दुके (द्वि.)– (शृङ्गेरी) विनायकः एस्.भट्टः, राजेन्द्रः एम्.भट्टः, दीपकमञ्जुनाथहेगडे, अरविन्दसिंहचूडावतः, नागराजः, मधुकेश्वरहेगडे, राजेन्द्रभट्टः, प्रसादभट्टः

कबड्डी (प्र.)– (लखनऊ) प्रवीणकुमारः, अनुजकुमारः, नवीनकुमारः, लीलाधरः, प्रदीपकुमार-आर्यः, विक्रमः, रामजी-उपाध्यायः, किशनकुमारः, पवनकुमारः

कबड्डी (द्वि.) - (गुरुवायूर्) सिजिलः एन्.एस्., अजयकुमारः, दिनेशकुमारः, राजकुमारः, शिवराजः, श्यामहरिः, सरिन्दसः टी.आर्., शरत् चन्द्रन्

५० के. जी. मल्लयुद्धे (पु.) - योगेशकुमारदाधीचः, सुरेन्द्र-अशोककुमारौ विकासगुले

५५ के. जी. मल्लयुद्धे (पु.) - नीरजकुमारः, कुलदीप-आर्यः, पूरणचन्दत्रिपाठि-चन्द्रप्रकाशौ

६० के. जी. मल्लयुद्धे (पु.) - अनुजकुमारः, हरीशकुमारः, सुरेशशर्म-राकेशकुमारौ

६६ के. जी. मल्लयुद्धे (पु.) - राजकुमारः, सन्दीपजुङ्गले, कुलदीपसिंहपिलवाल-पुरुषोत्तमौ

७४ के. जी. मल्लयुद्धे (पु.) - हरीशकुमारः, हरिओम् परबः, अरविन्दसिंहचूडावत-नवीनकुमारौ

चतुरङ्गे - गणेशहेगडे-राजेन्द्रभट्टौ, सञ्जयकुमारराय-रुद्रनारायणरथौ, मुरलीधरपालीवाल-गौरवशर्माणौ

### विशेषप्रदर्शनम्

योगासने - केसरमल, शिवराजः, राजकुमारः, अमितधीमान्, सौम्यरञ्जनकरः रोहितासकुमारः, अङ्कुरवर्मा, जयकृष्णः, जगदीशकुमारः, विवेकशर्मा





श्रीसदाशिवपरिसरस्य वार्षिकोत्सवे मञ्चासीनाः – वामतः रामानुजदेवनाथः, महेश्वरमहान्तिः, जि.गङ्गन्ना च।

# पुरीपरिसरे

## ➢ वार्षिकोत्सवः

पुरीस्थस्य श्री सदाशिवपरिसरस्य "वार्षिकोत्सवः" ऐषमः २३.१२.२००९तमे दिनाङ्के समनुष्ठितः। कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन उपस्थाय ओडिशाराज्यस्य विधानसभासदस्यः पूर्ववाचस्पतिः पुरीविधाकः श्रीमहेश्वरमहान्तिः "संस्कृतभाषायाः प्रचारप्रसारः अस्माकं सर्वेषां कर्तव्यम्" इत्यवादीत्। मुख्यवक्तृत्वेन समुपस्थाय नवदेहलीस्थस्य राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः आचार्यः रामानुजदेवनाथवर्यः "इतरपरिसरापेक्षया समृद्धेऽस्मिन् परिसरे शास्त्राणां प्रसारे, छात्रेषु गुणवत्तासंवर्धने च सर्वेषां सहयोगः अपेक्ष्यते" इति निरदिशत्। अध्यक्षस्थानमलङ्कुर्वाणः परिसरप्राचार्यः डा.जि.गङ्गन्नामहोदयः परिसरस्य सर्वतोमुखाभ्युदयं मञ्चासीनयोः विधायक-कुलसचिवयोः पुरस्तात् न्यवेदयत्।

कार्यक्रमेऽस्मिन् डा.के.वि.सोमयाजुलुः मङ्गलाचरणं, आचार्यः अतुलकुमारनन्दः स्वागतं, डा. मदनमोहनझा वार्षिकवृत्तान्त-पठनं, डा. सूर्यमणिरथः धन्यवादं, आचार्यः एम्.चन्द्रशेखरः सभासञ्चालनं च अकार्षुः। परिसरस्य वार्षिकपत्रिकायाः "पौर्णमासी"-नामिकायाः लोकार्पणमपि मुख्यातिथिवर्येण क्रमेऽस्मिन् विहितम्। सांस्कृतिककार्यक्रमेषु श्रीपूर्णचन्द्रमहापात्रस्य मार्गदर्शने "भक्तकविः जयदेवः" इति संस्कृतनाटकं, उत्कलनाटकं चैकं प्रदर्शितम्। तथैव अन्येऽपि केचन चित्ताकर्षकाः कार्यक्रमाः छात्राणां द्वारा उपस्थापिताः।


## ➢ शिक्षाशास्त्रिविभागीयसङ्गणकप्रयोगशालायाः उद्घाटनम्

ऐदम्प्राथम्येन शिक्षाशास्त्रिविभागे सङ्गणकशिक्षायाः समावेशः सञ्जातः। तत्र उपाशीतिच्छात्रैः सङ्गणकशिक्षा स्वीकृतेति कृत्वा संस्थानेन सङ्गणकानि उपकल्पितानि। प्रसङ्गेऽस्मिन् २३.१२.२००९तमे दिनाङ्के शिक्षाशास्त्रिविभागीया सङ्गणकप्रयोग- शाला मान्येन संस्थानकुलसचिवेन समुदघाटि।


शिक्षाशास्त्रिविभागीयसङ्गणकप्रयोगशालाम् उद्घाटयन् कुलसचिवः।

## ➢ बालचरसङ्घः

१४.१२.२००९ तः २१.१२.२००९ दिनाङ्कपर्यन्तं श्री सदाशिवपरिसरे शिक्षाशास्त्रिविभागस्य छात्राध्यापकानां छात्राध्यापिकानां च कृते 'भारत-स्काउट एवं गाइड'-पक्षतः मौलिकपाठ्यक्रमः समायोजितः। परिसरप्राचार्यस्य डा.जि. गङ्गन्नावर्यस्य मार्गदर्शने, पाठ्यक्रमप्रमुखयोः श्रीललितमोहनपट्टनायक-सुश्री निधी-त्रिपाठिवर्ययोः तत्त्वावधाने, शिक्षाशास्त्रिविभागाध्यक्षस्य एम्. चन्द्रशेखरवर्यस्य, विभागीयाध्यापकानां च उपस्थितौ उद्घाटनकार्यक्रमः सुसम्पन्नः। समापनसमारोहे ओडिशाराज्यस्य आयुक्तः श्रीकालीप्रसादमिश्रः उपस्थाय बालचरसङ्घस्य आभूषणैः सर्वान् विभूषितवान्।



पू.प्र.सं.मन्दिरे ग्रन्थलोकार्पणावसरे प्रह्लादाचार्यः, श्रीश्रीविश्वेशतीर्थस्वामिनः, राधावल्लभत्रिपाठी च

## पूर्णप्रज्ञसंशोधनमन्दिरे आयुर्वेदगोष्ठी : आयुर्वेदवैभवम्

जनसमूहेषु आयुर्वेदशास्त्रविषये जागृत्यर्थं पूर्णप्रज्ञसंशोधन-मन्दिरेण ऐषमः नवम्बरमासे विंशतितमे, एकविंशतितमे च दिनाङ्के आयुर्वेदगोष्ठी समायोजिताऽऽसीत्। आयुर्वेदगोष्ठीं न्यायमूर्तिः एम्.एन्. वेङ्कटाचलय्यमहाभागः नवदेहलीस्थसर्वोच्चन्यायालयस्य निवृत्तमुख्य-न्यायाधीशः प्रातः सार्धनववादने ज्योतिप्रज्वालनद्वारा समुदघाटयत्। परमपूज्याः पेजावरमठाधीशाः श्रीश्रीविश्वेशतीर्थश्रीपादाः सभाया अध्यक्षपदवीं समारुह्य आशीर्वचनैः सभ्यान् समन्वगृह्णन्। प्रा.डि. प्रह्लादाचार्यः (पूर्णप्रज्ञसंशोधनमन्दिरस्याध्यक्षः), डा.ए.वि. नागसम्पिगे-महाभागः निदेशकः च स्वोपस्थित्या सभाशोभाम् अभिवर्धितवन्तौ। पञ्चदशाधिका आयुर्वेदविद्वांसः गोष्ठ्यामस्यां नैकविषयेषु विमर्शात्मकप्रबन्धममण्डयन्। जनताया आरोग्यरक्षणार्थं नीरोगार्थं च जगति आविर्भूतमायुर्वेदशास्त्रं यद्यपि अतिप्राचीनं वर्तते तथापि इदानीन्तनकालेऽपि नित्यनूतनतया विराजते इत्यभिप्रायः सर्वैः प्रकटितः। द्वाविंशतितमे दिनाङ्के **मनःशास्त्रविषयिणी गोष्ठी** प्रावर्तत यस्याः समुद्घाटनं संस्थानकुलपतिना आचार्येण राधावल्लभत्रिपाठिमहोदयेन कृतम्।

## गङ्गानाथझापरिसरे शिक्षादिवसः

११.११.०९तमे दिनाङ्के मौलाना-अबुल-कलाम-आजादस्य जन्म-दिवसम् उपलक्ष्य प्रयागस्थे राष्ट्रिय-संस्कृत-संस्थानस्य गङ्गानाथ-झा-परिसरे **'शिक्षा-दिवससमारोहः'** आयोजितः। विचार-गोष्ठीरूपस्यैतस्य कार्यक्रमस्याध्यक्षता कार्यवाहक-प्राचार्येण डॉ. बनमाली-बिश्वालेन कृता। मुख्यवक्तृरूपेण डॉ. ललितकुमार-त्रिपाठिना स्ववक्तव्यं प्रस्तुतं तथा कार्यक्रमस्य सञ्चालनं संयोजनञ्च डॉ. अपराजिता-मिश्रया कृतम्।

कार्यक्रमस्य प्रारम्भे डॉ. शैलजा पाण्डेया सूचितवती यत् प्रथमः शिक्षामन्त्री अबुल-कलाम-आजाद-महोदयेन प्रथम-शिक्षाधिवेशनं प्रयागे एव आयोजितम्। तयोक्तं यत् शिक्षा सर्वैः प्राप्तव्या। एतदवसरे तया अबुल-कलाम-आजादस्य शिक्षागतावधारणमुद्दिश्य तथा शिक्षागतोद्देश्यमधिकृत्य च विचारः प्रस्तुतः। मुख्यवक्तृणा डॉ. ललितकुमार-त्रिपाठिना 'सत्यं ब्रूयात् प्रियं ब्रूयात् अपि ब्रूयात् सत्यमप्रियम्' इति प्रत्यपादि। तेनोक्तं यत् महती समस्या इयं वर्तते यद् वयं यद् वदामस्तन्न जीवामः। तेनोक्तं यदद्यतनशिक्षा-प्रणालीमङ्गीकृत्य पारम्परिकी शिक्षा-पद्धतिः सज्जीकर्तव्या। तेनैतदप्युक्तं यदस्माकं सर्वप्रथमो गुरुः माता एव भवति। अतः सर्वप्रथमं नारी-मस्तिष्कं सुशिक्षितं कर्तव्यम्। अस्माभिः बालिका-शिक्षा पाश्चात्यदेशान्नाङ्गी-कर्तव्या यतो हि कस्यचिद् देशस्य स एव आदर्शो भवेद् यः तद्देशस्य नारीणाम् आदर्शो भवति। वयं यत्र कुत्रापि भवामस्तत्रास्माभिः व्यक्तिगतस्तरे गुणात्मकं संशोधनं कर्तव्यम्। अध्यक्षेण डॉ. बनमाली-बिश्वालेन प्रतिपादितं यत् मानवीय-शिक्षाया आरम्भस्तु मातृगर्भादेव भवति यस्याः संस्कारः जन्म-जन्मान्तरं यावदक्षुण्णः प्रचलति। अभिमन्युः मातृगर्भादेव चक्रव्यूहभेदविषये व्यजानात्। एवमेव अस्मिन् जन्मनि गृहीताया विद्यायाः संस्कारः जन्मान्तरेऽपि प्राप्तुं शक्यते इत्यस्य नैकानि प्रमाणानि अस्माकं संस्कृत-वाङ्मये उपलभ्यन्ते। प्रकृतेः तथा पशु-पक्षिभ्यः अस्माभिः नैकाः शिक्षाः प्राप्यन्ते। बालकोऽपि अस्माकं गुरुः भवितुं शक्नोति। नीचादप्युत्तमा विद्या प्राप्तव्या भवति। न केवलं शिष्यः किन्तु गुरुः अपि आदर्शवादी भवेद् यतोहि गुरुः केवलं कक्षायामेव न अपितु स्वकीयाचरण-माध्यमेनापि छात्रेभ्यः शिक्षां प्रददाति। डॉ. अपराजिता-मिश्रया सभासञ्चालनावसरे उक्तं यद् 'अबुल-कलाम-महोदयेन भारतस्य शिक्षानीतौ प्रभूतः सहयोगः आचरितः। विश्वविद्यालय-अनुदान-आयोगस्य निर्माणेऽपि तस्य महती भूमिका आसीत्। अद्य शिक्षा-दिवस-पालनस्य महती आवश्यकता वर्तते। छात्राणां, शिक्षकाणां तथा शिक्षायाश्च दशा समुन्नेया। डॉ. रामकिशोरझा इत्यनेन दण्डिनः एकं श्लोकम् उद्धृत्य उक्तं यद् यावत् शब्दस्य ज्योतिः न प्रकाशेत तावत् जगद् अन्धकारमयं स्थास्यति। डॉ. अरुणकुमारत्रिपाठिना उक्तं यत् शिक्षायां छात्राः हस्तकौशलोपरि ध्यानं दद्युः। सर्वैः छात्रैः स्वस्वगुरोः सम्मानः कर्तव्यः। एतदतिरिच्य डॉ. श्यामसुन्दर-पाण्डेयेन, श्री जितेन्द्र-पाण्डेयेन, श्रीपवनकुमारेण तथा रोहिणीमिश्रया कार्यक्रमेऽस्मिन् विविध-विचाराः व्यक्तीकृताः। कार्यक्रमस्य अन्ते डॉ. शैलजा-पाण्डेया सर्वान् धन्यवादैः सभाजितवती। अस्मिन् कार्यक्रमे परिसर-परिवारस्य सर्वे सदस्याः, कर्मचारिणः, छात्राः तथा नगरस्य नैके श्रोतारः उपस्थिता आसन्।

परिसरवार्ता

## गरलीपरिसरवार्ता

- **विश्वविद्यालयानुदानायोगद्वारा परिसरनिरीक्षणम्**

विश्वविद्यालयानुदानायोगद्वारा प्रेषितेन दलेन २८.१०.२००९ दिनाङ्के गरलीपरिसरस्य निरीक्षणं विहितम्। निरीक्षणदलेऽस्मिन् नागपुरस्थस्य कविकुलगुरु-कालिदास-संस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः पङ्कजचान्देमहाभागः उत्तराखण्डसंस्कृतविश्व-विद्यालयस्य कुलपतिः आचार्या सुधारानीपाण्डेया, संस्थानमुख्यालयस्य प्रतिनिधिभूता शुक्लामुखर्जी, चासन्। निरीक्षणदलं छात्रैरध्यापकैश्च सह चर्चामकार्षीत्। संस्थानपरिसरस्यास्य समृद्धं पुस्तकालयं सुव्यवस्थित-मध्ययनाध्यापनक्रमञ्च निरीक्ष्य दलमिदं भृशमतुष्यत्।

- **शास्त्रीयस्पर्धा**

गरलीपरिसरे सम्भागस्तरीयवाक्स्पर्धायाः आयोजनं नवम्बरमासस्य चतुर्थे-पञ्चमे-षष्ठे च दिनाङ्केऽभूत्। अत्र हरियाणा-पञ्जाब-चण्डीगढ़-हिमाचलप्रदेशानां पारम्परिकसंस्कृतशिक्षणसंस्थासु अधीयानाः छात्राः प्रतिभागित्वेन अत्रामन्त्रिताः। हिमाचलस्य डोहगी-हरोली-करसोग-स्थितैः संस्कृतमहाविद्यालयैः हरियाणा-प्रान्तान्तर्गताम्बालानगरस्थसंस्कृतमहाविद्यालयेन च प्रतिभागित्वं निर्व्यूढम्। गरलीपरिसरच्छात्राश्च बाहुल्येनात्र स्पर्धिनोऽभूवन्।

व्याकरण-ज्यौतिष-साहित्य-साङ्ख्य-न्याय-वेदान्त-धर्मशास्त्रेषु प्रतिभागिनः अस्पर्धन्त। अष्टाध्यायीकण्ठपाठे कोषपाठे समस्यापूर्तौ चाऽपि प्रतिभागिनः समवेताः। समारोहेऽस्मिन् मुख्या-तिथिरूपेण आचार्यः ब्रजबिहारीचौबेमहोदयः होशियारपुरतः समागतः। आचार्यः वीरेन्द्रकुमारमिश्रः (शिमलास्थ-हिमाचलप्रदेश-विश्वविद्यालयस्य संस्कृतविभागाध्यक्षः) सारस्वतातिथिरभूत्। समारोहेऽस्मिन् काशीहिन्दूविश्वविद्यालयस्य ज्यौतिषविभागाध्यक्षः आ. चन्द्रमापाण्डेयः विशिष्टातिथित्वेनोपस्थितोऽभूत्। समापनसमारोहे गरलीपरिसरस्य प्राचार्येण विजेतॄणां छात्राणां कृते पुरस्कारप्रदानं कृतम्। पुरस्कृतच्छात्रेषु प्रथमस्थानभाजः राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे नवम्बरमासस्यान्तिमे सप्ताहे समायोजितायाम् अखिलभारतीय-शास्त्रीयस्पर्धायां प्रतिभागिनो भवितुं पात्रतामाप्नुवन्।

● **गरलीपरिसरस्य नूतनभवननिर्माणारम्भः**

२३.११.२००९ दिनाङ्के गरलीग्रामात् पञ्चसु सहस्रमानेषु स्थितस्य 'बलाहर'-ग्रामस्योपकण्ठे विपाशाया नद्यास्तीरे पूर्वमावण्टिते चतुर्भित्ति-कोपेते भूभागे भूमिपूजनपुरस्सरं शुभमुहूर्ते प्रातःकाले भवननिर्माणा-रम्भोऽभूत्। भूमिपूजनावसरे परिसरप्राचार्येण सह ज्यौतिषविभागाध्यक्षः डॉ. मदनमोहनपाठकः कतिपये संस्थानस्य कर्मचारिणः विद्यार्थिनश्च समवेताः अभूवन्।

● **शोधसमितेरुपवेशनम्**

गरलीपरिसरे ०४.१२.२००९ दिनाङ्के शोधार्थिनां पञ्जीकरणार्थं शोधसमितेरुपवेशनमभूत्। तत्र परिसरप्राचार्येण प्रकाशपाण्डेयेन सह आचार्यः वीरेन्द्रकुमारमिश्रः (हिमाचलप्रदेशविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः) सदस्यत्वेनोपस्थितोऽभूत्। अत्र परिसरस्य सर्वेऽपि विभागाध्यक्षाः समवेताः अभवन्। साक्षात्कारानन्तरं सुपात्रच्छात्राणां शोधोपाधये पञ्जीकरणार्थं समित्या संस्तुतिः कृता।

● **सायङ्कालीना भाषाशिक्षणगोष्ठी शास्त्रीयगोष्ठी च**

गरलीपरिसरे प्रवर्तमानसत्रे जुलाईमासत एव साहित्य-विभागाध्यक्षस्य डॉ. विजयपालशास्त्रिणः निर्देशने छात्राणां सायङ्कालीना गोष्ठी प्रवर्तते। तत्र परिसरस्य छात्राः स्वेच्छया समेवताः संस्कृतभाषायाः प्रौढं प्रशिक्षणं प्राप्नुवन्ति, शास्त्रीयविषयाणां विमर्शं च कुर्वन्ति। इयं गोष्ठी नियमतः संस्कृतमाध्यमेनैवानवरतं प्रवर्तते।

## लखनऊपरिसरे

❖ **राज्यद्वयस्तरे शास्त्रीयस्पर्धा**

८.११.०९ तमे दिनाङ्के लखनऊपरिसरे उत्तरप्रदेश- उत्तराखण्डराज्ययोः स्पर्धालूनां कृते सम्भागस्तरीया शास्त्रीयस्पर्धा आयोजिता अभूत्। रा.सं.संस्थानेन आयोजितायाम् अखिलभारतीयायां शास्त्रीयस्पर्धायां भागग्रहणाय प्रेषणाय अनयोः राज्ययोः स्पर्धालूनां चयनार्थम् एषा सम्भागस्तरीया स्पर्धा आयोजिता आसीत्। कार्यक्रमेऽस्मिन् पर्यवेक्षकरूपेण आचार्यः राजेन्द्रमिश्रः (भूतपूर्वकुलपतिः, सं.सं.वि.वि., वाराणसी), आचार्यः ओम् प्रकाशपाण्डेयः (संस्कृतविभागाध्यक्षः, लखनऊ वि.वि.), आचार्यः रमाशङ्करमिश्रः (संस्कृतविभागाध्यक्षचरः, ल.वि.वि.), आचार्यः वृजेशकुमारशुक्लः (ल.वि.वि.), आचार्यः सुरेन्द्रझाः (प्राचार्यः, गङ्गानाथझापरिसरः, रा.सं.सं., इलाहाबाद) इत्येते समुपस्थिताः आसन्।




वार्षिकोत्सवे उपविष्टाः दिनेशशर्मा, आजादमिश्रः, रा.व.त्रिपाठी, ओम् प्रकाशतिवारी, भाषमाणः सर्वनारायणझाः

❖ **वार्षिकोत्सवः**

दिसम्बरमासस्य द्वादशेऽहनि परिसरस्य वार्षिकोत्सवः सम्पन्नः। समारोहस्य आध्यक्ष्यं विदधानेन कुलपतिना परिसरस्य प्राचार्यो निर्दिष्टः यत् परिसरस्य आगमिनं रजतजयन्तीसमारोह-मधिकृत्य प्रक्रमाः प्रारब्धव्या इति। अस्मिन्नेव क्रमे कुलपतिना परिसरे नूतनपुस्तकालयभवनस्य प्रेक्षागृहस्य च निर्माणोद्घोषणा कृता। समारोहस्य मुख्यातिथित्वं उ.प्र. विधानपरिषत्सदस्येन आ. ओम्प्रकाशतिवारिमहोदयेन, विशिष्टातिथित्वञ्च नगरप्रमुखेन डॉ. दिनेशशर्मणा निर्व्यूढम्। अतिथिद्वयेन संस्कृतस्य साम्प्रतिकी प्रासङ्गिकता सम्यगुपस्थापिता। प्राचार्येण सर्वनारायणझामहोदयेन परिसरस्य वार्षिकप्रतिवेदनं प्रस्तुतम्। कार्यक्रमस्य सञ्चालनम् आचार्येण बटोहीझावर्येण कृतम्। समारोहेऽस्मिन् विविधप्रतियोगितासु सफलाश्छात्राः कुलपतिना अतिथिद्वयेन च पुरस्कृताः। तत्र च सर्वश्रेष्ठक्रीडालुरूपेण बालिकासु ज्योतिकुमारी बालकेषु च प्रदीपकुमारः पुरस्कारं प्राप्तवन्तौ। सायङ्काले वाल्मीकिप्रेक्षागृहे अभिज्ञानशाकुन्तलस्य शकुन्तलाप्रत्यादेशो नाम पञ्चमाङ्कः परिसरीयैश्छात्रैः मञ्चितोऽभूत्।

### लब्धयशा 'गोमती' पत्रिका




गोमतीपत्रिकायै पुरस्कारं प्रयच्छन् श्रीतुषारकान्तिबनर्जीमहोदयः

लखनऊ-परिसरस्य वार्षिकी शोधपत्रिका 'गोमती' उत्तरप्रदेशे मुद्रितासु सर्वासु सांस्थानिकपत्रिकासु अतिशायिनी वर्तते इति नगरराजभाषाकार्यान्वयनसमितेः अध्यक्षेण केन्द्रीयौषधि-अनुसन्धानसंस्थानस्य निदेशकेन च श्रीतुषारकान्तिबनर्जी- महोदयेन सम्मानाशयः प्राकाशि। सप्रमाणपत्रवैजयन्ती च परिसरप्रमुखस्य प्राचार्यस्य सर्वनारायणझामहोदयस्य सविधे प्रदत्तेति हर्षस्यायं विषयः। एतदभिलक्ष्य प्राचार्यं, सम्पादकगणं, लेखकगणं च अभिनन्दति 'संस्कृतवार्ता'।

## ❖ अनौपचारिकसंस्कृतशिक्षणम्

जनसामान्यान् संस्कृतं पाठयितुं लखनऊ परिसरे अक्टूबरमासस्य एकविंशतिदिनाङ्के अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्य शुभारम्भः समजायत। त्रैमासिकं केन्द्रमिदं डॉ. लक्ष्मीनिवासपाण्डेयस्य निरीक्षकत्वे केन्द्रशिक्षकेण जगदीशकुमारेण प्रचाल्यते। केन्द्रेऽस्मिन् चत्वारिंशत् प्रतिभागिनः प्रतिदिनं संस्कृतभाषाशिक्षणं प्राप्नुवन्ति।

## ❖ शब्दब्रह्मभक्तिविमर्शः

दिसम्बरमासस्य षोडशेऽहनि डॉ. रामनारायणमिश्रस्य "शब्दब्रह्मपरकभक्तिविमर्शः" इति विषये व्याकरणविषयकं विशिष्टव्याख्यानं सम्पन्नतामगात्। मिश्रनये मध्यमानादध्वनिना व्यङ्ग्यस्फोट एव वैखरीवाग्रूपेण विपरिणमते। तदेव च शब्दब्रह्म भागवतादिग्रन्थेषु शब्दरूपेण भक्तिमार्गस्य उपायभूतम्। आचार्येण सुरेन्द्रपाठकेन वाक्यपदीयानुसारं शब्दस्य महत्त्वं प्रतिपाद्य मिश्रमहोदयस्य धन्यवादज्ञापनं कृतम्।

## ❖ छात्रविकासपरिषदः घटनम्

छात्राणां सर्वाङ्गीणविकासाय अक्टूबरमासस्य त्रयोदशेऽहनि लखनऊपरिसरे छात्रविकासपरिषत् सङ्घटिता। अस्याः परिषदः उद्देश्यं यू.जी. सी. नेट, जे.आर.एफ., विविधप्रतियोगिपरीक्षासु च छात्राणां साफल्याय अतिरिक्तकालांशानामायोजनमिति। परिषदियं प्राचार्यस्य सर्वनारायणझामहोदयस्य आध्यक्ष्ये, डॉ. धनीन्द्रकुमारझामहोदयस्य संरक्षकत्वे च प्रचलति।

### विद्वत्कृतयः लोकायार्पिताः

- आचार्यराधावल्लभत्रिपाठिप्रणीतः **अभिनवकाव्यालङ्कार-सूत्रग्रन्थः**, डॉ.-रमाकान्तपाण्डेयप्रणीतहिन्दीव्याख्यासहितः।
- डॉ. उमाकान्तचतुर्वेदिप्रणीता **अयोध्यातीर्थप्रशंसा**।
- जयपुरपरिसरस्य **रजतजयन्तीवर्षस्मारिका** (प्रधानसं.-प्रा. अर्कनाथचौधरी, सं. रमाकान्तपाण्डेयः)
- गरलीपरिसरस्य डा. मदनमोहनपाठकेन सम्पादितं **जगन्नाथपञ्चाङ्गम्**।
- जयपुरपरिसरपत्रिका-**जयन्ती (हिन्दकेसरिस्मृतिविशेषाङ्कः)** (प्र.सं.आ. वासुदेवशर्मा, सं. डा. रमाकान्तपाण्डेयः वाई.एस्. रमेशश्च

उपर्युक्ताः कृतयः जयपुरपरिसरे अनतिपूर्वं लोकायार्पिताः।




प्राचार्यस्य आजादमिश्रस्य आयोजकत्वे आचार्यस्य प.ना. शास्त्रिणः संयोजकत्वे २९.१०.२००९ तः ३१.१०.०९ पर्यन्तं भोपालपरिसरेण टी.टी.टी. आई सभागारे मध्यप्रदेश-गुजरात-छत्तीसगढराज्यानां स्पर्धालूनां कृते सम्भागस्तरीय- शास्त्रीयस्पर्धा भोपालपरिसरे समायोजिता।

## जयपुरपरिसरे

### ➲ समसामयिकविषयव्याख्यानमाला

१६.१२.०९तमे दिनाङ्के अपराह्णे जयपुरपरिसरे अर्बुदरोगाद् रक्षणोपायमधिकृत्य व्याख्यानानि अभवन्। परिसरप्राचार्यस्य नेतृत्वे शिक्षाशास्त्रविभागेन संयोजितस्य अस्य कार्यक्रमस्य आध्यक्ष्यं देवर्षिश्रीकलानाथशास्त्रिवर्येण अलङ्कृतम्। मुख्यवक्तृरूपेण श्री वी. के.सिंहः, श्री अश्विनीकुमारबोहरा, डा. अरुणजोगले च समाहूता आसन्।



### ➲ पं. मधुसूदन-ओझा-स्मृतिव्याख्यानम्

१८.१२.०९तमे दिनाङ्के परिसरप्राचार्यस्य अर्कनाथचौधरीमहोदयस्य आध्यक्ष्ये पं. मधुसूदन-ओझा-स्मृतिव्याख्यानं प्रावर्तत। मुख्यवक्तृरूपेण आचार्यः अशोक-अक्लुजकरः (एशियन्-विषयकाध्ययनविभागः, ब्रिटिश्-कोलम्बियाविश्वविद्यालयः, कानाडा), समुपस्थाय वाक्यपदीयम् आधारीकृत्य सारगर्भं भाषणमकरोत्। देवर्षिः कलानाथशास्त्रि-महोदयः (अध्यक्षः, स्थानीयपरामर्शदातृसमितिः) विशिष्टातिथिपदमलङ्कृत्य सभामुदबोधयत्। परिसरप्राचार्यः अर्कनाथचौधरी उपस्थितान् विदुषः सममानयत्।



## गुरुवायूर्-परिसरीयवार्ता



पुरस्कारं प्राप्नुवन् के.टी. माधवन्

राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूर्-परिसरस्य प्राचार्यः आचार्यः के.टी. माधवन्महोदयः काक्कश्शेरि-भट्टतिरि-स्मारकपुरस्कारेण सम्मानितः। आचार्य-पि.सि. वासुदेवन्-इलयत्-स्मारकसमित्या स्थापितमिमं पुरस्कारं वर्षेऽस्मिन् आचार्यः के.टि. माधवन् महोदयः प्राप्नोत्। २७.१०.०९ दिनाङ्के परिसरे समायोजितायां सभायां भूतपूर्वविधानसभाध्यक्षः श्री तेरम्पिल्-रामकृष्णमहाभागः अनेन पुरस्कारेण प्राचार्यस्य के.टि. माधवन् महोदयस्य सम्माननम् अकरोत्।

काक्कश्शेरि-भट्टतिरिणा विरचितं 'वसुमतीमानविक्रमम्' अवलम्ब्य शोधप्रबन्धं प्रस्तुतवता के.टी. माधवन्महोदयेन काक्कश्शेरिभट्टतिरेः साहित्यं जनमध्ये प्रचारयितुं प्रयत्नः कृतः इति आचार्यः पि.सि. मुरलीमाधवन् महोदयः, (पि. सि. वासुदेवन् इलयत् स्मारक समित्यध्यक्षः, शङ्कराचार्य-संस्कृतसर्व- कलाशालायाः सङ्घायप्रमुखः च) स्वीयभाषणे अवोचत्।

शुभावसरेऽस्मिन् स्वामिनः प्रशान्तानन्दजीमहोदयाः श्रीरामकृष्णमठाध्यक्षाः आशंसाभाषणैः सभाम् उद्बोधितवन्तः। आचार्य-पि.जि. श्रीनिवासमहोदयः (व्याकरणविभागाध्यक्षः) तथा श्री. के.एल्. सेबास्त्ययन् (सेवानिवृत्तः अध्यापकः) आशंसाभाषणैः आनन्दं प्रकटितवन्तौ।

## विशिष्टव्याख्यानमाला राष्ट्रियसङ्गोष्ठी च

गुरुवायूर्परिसरे १७.११.०९ तः २०.११.०९ पर्यन्तं विशिष्टव्याख्यानमाला राष्ट्रियसङ्गोष्ठी च समायोजिता आसीत्। कार्यक्रमस्यास्य समुद्घाटनं १७.११.०९ तमे दिनाङ्के कोयिलाण्डी-श्रीरामकृष्णमठाध्यक्षैः स्वामिपादैः श्रीस्वप्रभानन्दमहाराजैः कृतम्। उपनिषदाम् आत्मज्ञानप्रतिपादकत्वम् अधिकृत्य स्वामिपादैः सारगर्भं प्रौढं सुन्दरं च भाषणं व्यधायि। परिसरप्राचार्यः के.टी. माधवन्वर्यः स्वीयाध्यक्षभाषणे वेदान्तशास्त्रस्य महत्त्वम् उपन्यस्तवान्। दिवङ्गतेन डा.पी.ए. मेनोन् महोदयेन सञ्चितपुस्तकानां समर्पणं तद्भागिनेयेन उमाशङ्करेण कार्यक्रमेऽस्मिन् कृतम्।

न्यायविभागीय-विशिष्टव्याख्यानमालायाः प्रथमसत्रे प्रथमं भाषणं शाब्दबोध इति विषयमधिकृत्य आचार्येण हरिदासभट्टेन कृतम्। परिसरीयः व्याकरणविभागाध्यक्षः आचार्यः डा. पि.जि. श्रीनिवासः स्वागतभाषणमकरोत्।



राष्ट्रियसङ्गोष्ठ्याः उद्घाटनावसरे स्वप्रभानन्दस्वामिनः, के.टी. माधवः, हरिदासभट्टः अन्ये च

द्वितीयसत्रे व्याख्याता डा. राधेश्यामः (सि. एस्.एस्. वि. काञ्चीपुरम्) परमाणुवादः इति विषयं अधिकृत्य, डा. कुमारी (प्रवाचिका, श्रीशङ्कराचार्य-संस्कृत-सर्वकलाशाला, कालटी) पीलुपाकपिठरपाकवादौ इति विषयम् अधिकृत्य च भाषणमकुरुताम्। इत्थं परिसरीयशास्त्रचूडामणिः आचार्या टि. आर्यादेवी महाभागा "परमाणुविषये शङ्कराचार्यस्य मतम्" इति शीर्षकम् अधिकृत्य अभाषत। विभागाध्यक्षस्य डा. मधुसूदनन्-महोदयस्य आध्यक्ष्ये प्रवृत्तेऽस्मिन् सम्मेलने स्वागतभाषणं डा. आर्. बालमुरुगन् महाभागेन, कृतज्ञताभाषणम् डा. एन्.आर्. श्रीधरन्-महाशयेन च कृतम्।

### ☞ साहित्यिकसङ्गोष्ठी

नवम्बर् अष्टादशदिनाङ्के बुधवासरे साहित्यविभागस्य एकदिनात्मक-सङ्गोष्ठी डा. इ.एम्. राजन् महोदयस्य आध्यक्ष्ये प्रावर्तत। केरलसर्वकलाशालायाः भूतपूर्वकुलपतिवर्येण डा. बालमोहन्तम्पीमहोदयेन उद्घाटनं निर्व्यूढम्। तदनन्तरं 'रस आण्ड कथरसिस' (Rasa & Catharsis) इति विषयमवलम्ब्य विशिष्टं भाषणं कृतम्। डा.डि. वासुदेवन्-महोदयेन "रीतिः शैली च" (Reeti & Style) इत्यस्मिन् विषये भाषणं कृतम्। आचार्यः चात्तनात्त् अच्युतनुण्णिः (कालिकट् सर्वकलाशाला) ध्वनिसिद्धान्तः, आधुनिक-विमर्शसिद्धान्तश्च (Theory of Dhwani and post modern critical Theory) इति विषये तथा च डा.के.वि. विश्वनाथन् (व्याख्याता गुरुवायूरपरिसरः) संस्कृते प्रहसनम्, अप्सुवेड-रङ्गभूमिः च (प्रहसन इन सान्स्क्रिट् आण्ड अप्सुवेड थियेटर) इति विषये स्वस्वपत्रे समर्पितवन्तौ।

☞ **व्याकरणशास्त्रे वाक्यार्थविचारः**



सभां सम्बोधयन् वासुदेवन् पोट्टिः

१९.११.०९ दिनाङ्के परिसरेस्मिन् विशिष्टव्याख्यानमालायां व्याकरणविभागीयवाक्यार्थविचारः आयोजितः आसीत्। आचार्यायाः वि.के. शैलजायाः आध्यक्ष्ये सम्पन्ने अस्मिन् कार्यक्रमे 'प्रातिपदिकम्' इति विषयं व्याख्यातुं विशिष्टवक्तृरूपेण संस्कृतक्षेत्रे विख्यातः केरलीयः राष्ट्रपति-पुरस्कारेण सम्मानितः आचार्यः आर्.वासुदेवन्-पोट्टिमहोदयः समाहूत आसीत्। तेन वाक्यार्थविचारस्य आवश्यकताप्रतिपादनपूर्वकं विविधपक्षाणां विवरणं प्रदत्तम्। छात्रा घटदीपवत् न भवेयुः इति सः अवदत्। 'पादं सब्रह्मचारिभ्यः' इति कथनं सफलीकर्तुं अवश्यं वाक्यार्थविचारः करणीयः इति, वादे वादे तत्त्वबोधो जायत इति च छात्रान् उदबोधयत्। कार्यक्रमेऽस्मिन् प्राचार्यमहोदयाः, अध्यापकाः, छात्राश्च उपस्थिता अभवन्। छात्रैः विविधविषये वाक्यार्थविचारः कृतः। साम्प्रतिके काले व्याकरणाध्ययनस्य आवश्यकता च प्रतिपादिता।

अपराह्ने प्रवृत्तसङ्गोष्ठ्यां आचार्यः आर्.वासुदेवन्-पोट्टिमहाभागः स्फोटार्थविचारं प्रास्तौत्। डा. पि.एन्. सुदर्शनः, (व्याख्याता, सर्वकारीयकलाशाला, तृपूणित्तुरा) 'वर्णपदस्फोटविचारः' इत्यमुं विषयमधिकृत्य प्रबन्धावतरणं कृत्वा उपन्यस्तवान्। आचार्यः के.टि. माधवन्महोदयः अवसरेऽस्मिन् आशंसाभाषणेन सभायाः महत्त्वं समेधितवान्। डा. सरलादेवी सञ्चालिका आसीत्। आचार्या सि. एल्. सिसिली स्वागतभाषणं, कुमारी मालिनी पि. कृतज्ञताभाषणञ्च अकरोत्। सर्वे छात्राः सोत्साहं भागमगृह्णन्।

☞ **वेदान्तसङ्गोष्ठी**

नवम्बर् विंशतिदिनाङ्के शुक्रवासरे राष्ट्रियसंस्कृतसंस्थानस्य गुरुवायूर्परिसरे अद्वैतवेदान्तविभागस्य एकदिनात्मकसङ्गोष्ठी प्रावर्तत। अस्यां सङ्गोष्ठ्यां परिसरस्यास्य प्राचार्येण अध्यक्षपदवी अलङ्कृता। उद्घाटनं प्रमुखसंस्कृतपण्डितवर्येण आचार्येण आर्. वासुदेवन् पोट्टिमहोदयेन कृतम्। तदनन्तरं पोट्टिमहाभागः "भामत्यनुसारं अध्यासलक्षणम्" इति विषयमधिकृत्य विशिष्टं भाषणमकरोत्। मध्याह्नानन्तरं विभागाध्यक्षया डॉ. आर्.प्रतिभया अध्यक्षपदवी अलङ्कृता। परिसरे शास्त्रचूडामणिपदव्यां विराजमानेन के.पि. बाबुदास्-महाभागेन "मायावादः" इत्यस्मिन् विषये, एवं कालटि-श्रीशङ्करकलाशालायां कार्यरतया डा. उषादेवीमहाभागया "अद्वैतवेदान्ते जीवतत्त्वविषये समस्याः" इति विषये च स्वस्वपत्रे समर्पिते। डा. एस्. सुब्रह्मण्यशर्मणा सञ्चालिते अस्मिन् कार्यक्रमे के.वि. कृष्णः, बि. अरुणकुमारः, भरतः च भागं गृहीतवन्तः।

## शृङ्गेरीपरिसरे नवनिर्मितं सभाभवनं समुद्घाटितम्

संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी १९.१०.०९तमे दिनाङ्के शृङ्गेर्यां राजीवगान्धीपरिसरे नूतनसभाभवनस्य, भाषाशिक्षणप्रयोगशालायाः च-समुद्घाटनम् परिसरस्य विश्वव्यापिजालपुटस्य (www.sringericampus.ac.in) च शुभारम्भम् अकरोत्। सभायामुपस्थितान् परिसरसदस्यान् उद्बोधयन् कुलपतिः स्वाभिप्रायं प्रकटितवान् यत् 'अयं परिसरः वेगेन विकासं साधयन् परिलक्ष्यते। परम्परासंरक्षणेन सह आधुनिकसूचनाप्रौद्योगिक्यादि-साधनसौकर्यस्य सदुपयोगे अपि परिसरस्य कौशलं दृष्ट्वा प्रसीदति मे मनः' इति। कार्यक्रमे समुपस्थितः संस्थानकुलसचिवः आचार्यः देवनाथः भाषमाणः न्यरूपयत् यत् कुलपतिवर्यस्य प्रशासनकौशलेन संस्थानपरिसराणामभिवृद्धिः वेगेन जायते; तत्कृपया एव एतत् कार्यत्रयं (सभाभवननिर्माणादिकं) सपदि परिपूरयितुं शक्यमभवत् इति। नवनिर्मिते सभाभवने इतःपरमनेके विद्वत्कार्यक्रमाः भवेयुः, जालपुटेन सूचनप्रसारादिना परिसरस्य यशः शक्तिश्च वर्धेत, भाषाप्रयोगशालया शिक्षणतन्त्रे विकासः जायेत इति च अवोचत्। परिसरप्राचार्यः स्वभाषणे सभाभवनादि-योजनात्रयस्य सङ्कल्पस्य साकारीकरणाय प्रयत्तवन्तं तदानीन्तनप्राचार्यं रामानुजदेवनाथमहोदयं, कुलपतिवर्यं च धन्यवादैः समलङ्कृतवान्।




नवनिर्मितसभाभवनस्य उद्घाटनावसरे कुलसचिवः, कुलपतिः, परिसरप्राचार्यश्च



नवनिर्मितं 'सुदुघा'-सभाभवनम्

# शृङ्गेरीपरिसरे

## ✠ शिक्षकदिवसः आचरितः

भारतस्य राष्ट्रपतिचरस्य डा. सर्वेपल्लिराधाकृष्णमहोदयस्य स्मृतौ परिसरे ५.९.०९तमे दिनाङ्के शिक्षकदिवसः समनुष्ठितः। आचार्यः वि.रामकृष्णभट्टः (कालटी) मुख्यातिथित्वेन समुपस्थित आसीत्। विद्वान् श्री पी. श्रीधराचार्यः (कार्कलम्), विदुषी श्रीमती भारती (बसरिकटे) विद्वत्तल्लजत्वेन सम्मानिताः। कर्णाटकराज्ये कार्कले एकस्यां स्वायत्त-प्रौढशालायां सर्वेऽपि छात्राः संस्कृतसम्भाषणसमर्था यथा भवेयुः तथा कृत-सार्थकप्रयत्नः श्री पी. श्रीधराचार्यः सम्मानोत्तररूपेण अवदत् यदयं सम्मानः संस्कृतसेवामुपलक्ष्य लब्धः। अतः सम्मान एषः वस्तुतः संस्कृतस्य एव। एतेन मम संस्कृतसेवादायित्वं द्विगुणितं सञ्जातम् इति। सम्मानिता श्रीमती भारती संस्थानेन कृतकार्यविषये स्वीयमानन्दं प्रकटितवती। आचार्यः वि. रामकृष्णः डा. सर्वेपल्लि-राधाकृष्णमहोदयस्य शैक्षिक-प्राशासनिक-नैपुण्यं विवृतवान्। प्राचीनशिक्षाप्रणाल्याः आधुनिकशिक्षाप्रणाल्याश्च गुणदोषविमर्शं प्रस्तुतवान्। शिक्षादिवसमुपलक्ष्य परिसरीयाध्यापकानां कृते छात्रैरायोजितायाम् अन्त्याक्षरीस्पर्धायां, केरम्-स्पर्धायां च विजयिभ्यः अध्यापकेभ्यः पुरस्कारप्रदानं च श्री-रामकृष्णमहोदयः अकरोत्। अन्त्याक्षर्यां डा. चन्द्रशेखरभट्टः, श्रीनाथः एच्. वि., डा. चन्द्रकान्तः च क्रमेण प्रथमद्वितीयतृतीयपुरस्कारान् आप्नुवन्। केरम् (द्विदल)-स्पर्धायां डा. भगवान्सामन्तराय-श्रीशशिधरौ प्रथमं, डा. सोमनाथ-डा गिरिधररावौ द्वितीयं च स्थानं प्राप्नुवन्।

स्वीयाध्यक्ष्यभाषणे परिसरप्राचार्यः (तदानीन्तनः) रामानुजदेवनाथवर्यः अवदत् यत् 'आचार्यरामकृष्णेन (मुख्यातिथिना) श्री सायण-राधाकृष्णमहोदययोः तुलनात्मकः यः विचारः प्रस्तुतः सः अनुसन्धानाय, इतोऽधिकचिन्तनाय वा प्रेरयति' इति। परिसरस्य शिक्षाशास्त्रविभागाध्यक्षः आचार्यः ए.पि. सच्चिदानन्दः भाषमाणः सर्वेपल्लिराधाकृष्णमहोदयः समेषामध्यापकानामादर्शभूतः इति वर्णितवान्। सभायाः आरम्भे डा. रामचन्द्रुलबालाजी स्वागतभाषणमकरोत्। अन्ते च डा. रामचन्द्रजोयिसः कृतज्ञतावचनानि समार्पयत्।

## ✠ शारदापूजा

शृङ्गेरीपरिसरेण ५.१०.०९ तमे दिनाङ्के शरत्कालीना शारदापूजा समनुष्ठिता। परिसरपरिवारसदस्याः तत्र भागमगृह्णन्। परिसरस्य छात्राः श्री रामकृष्णभट्ट-राघवेन्द्रभट्ट-सीतारामाः सर्वसहयोगेन श्रीशारदां समर्चितवन्तः। सन्दर्भेऽस्मिन् समुपस्थितान् उद्बोधयता प्राचार्येण सच्चिदानन्दवर्येण उक्तं यत् श्रद्धया अनुष्ठीयमानः ईदृश-पारम्परिककार्यक्रमः बुद्धिवर्धनाय, मनसः शान्त्यै, भगवदनुग्रहाय च कल्पेत इति। डा. महाबलेश्वरभट्टः कार्यक्रमसंयोजनमकरोत्।

## ✠ कार्यशाला

७.१०.०९तमे दिनाङ्के शिक्षाशास्त्रविभागेन आयोजितायां कार्यशालायां संस्कृत-सम्भाषणसन्देशपत्रिकायाः सम्पादकः विद्वान् जनार्दनहेगडे छात्रान् उदबोधयत्।

## ✠ शारदाविशिष्टव्याख्यानमाला

परिसरस्य शारदाविशिष्टव्याख्यानमालायां तृतीयं व्याख्यानपुष्पं प्रसिद्धविदुषा आचार्येण वासुदेवपोट्टिमहोदयेन ११.०९.०९ तमे दिनाङ्के समर्पितम्। तेन महोदयेन अद्वैतवेदान्तमतानुसारेण तमसः विषये विशिष्टं विवरणं कृतम्। भाषणान्ते सभायामुपस्थितैः प्रकटितजिज्ञासानामपि समाधानं पोट्टिवर्येण व्यधायि। परिसरप्राचार्यस्य ए.पि. सच्चिदानन्दमहोदयस्य आध्यक्ष्ये कार्यक्रमोऽयं प्रावर्तत। डा. सूर्यनारायणभट्टेन (शारदाविशिष्ट-व्याख्यानमालायाः संयोजकेन) संयोजिते अस्मिन् कार्यक्रमे आरम्भे डा. गणेशईश्वरभट्टेन समाहूत-विदुषः परिचयः अकारि, अन्ते च कार्तज्ञ्यं प्रकटितम्।

शारदाव्याख्यानमालायाः एव चतुर्थं व्याख्यानं १२.१०.०९तमे दिनाङ्के समायोजितं यत्र तिरुपतिस्थ-वैदिकविश्वविद्यालयस्य कुलपतिः आचार्यः सन्निधानं सुदर्शनशर्मा साहित्यशास्त्रस्य शास्त्रत्वं प्रत्यपादयत्।

शारदाव्याख्यानमालायाः पञ्चमं व्याख्यानं विधातुं मीमांसाशास्त्रविद्वान् आचार्यः नारायण-अडिगः समाहूत आसीत्। तेन कर्मभेदविचारम् अधिकृत्य विस्तरेणोपन्यस्तम्। स्वीयाध्यक्षभाषणे आचार्यः ए.पि. सच्चिदानन्दवर्यः अवोचत् यत् अङ्गुलिगणनीयेषु विशिष्टेषु मीमांसाशास्त्रवेत्तृषु नारायण-अडिगवर्यः अन्यतमः इति। डा. सुब्रायः वि.भट्टः अडिगमहोदयस्य वैदुष्यस्य परिचयप्रदानपुरस्सरम् सभायाः आरम्भे परिसरपक्षतः स्वागतं व्याहरत्। अन्ते च श्रीवेङ्कटेशताताचार्यः धन्यवादं समार्पयत्।

१३.१०.०९ तमे दिनाङ्के शारदाविशिष्टव्याख्यानमालायाः षष्ठं व्याख्यानम् आयोजितम्। तत्र महामहोपाध्यायः आचार्यः श्रीवत्साङ्काचार्यः धातुकलासम्बन्धः इति विषयमधिकृत्य प्राचीनाचार्याणां मतान्युद्धृत्य विशिष्टं भाषणमकरोत्। परिसरप्राचार्यः अध्यक्षभाषणावसरे व्याकरण-ज्योतिषशास्त्रयोः सम्बन्धं व्यवृणोत्। डा. चन्द्रशेखरभट्टेनादौ विद्वत्परिचयः कारित आसीत्। श्री के. पद्मनाभेन परिसरपक्षतः धन्यताभावः प्राकाशि।

## ✠ वाक्यार्थपरिषत्

परिसरीय-वाक्यार्थपरिषदः चतुर्थमधिवेशनं २०.१०.०९तमे दिनाङ्के प्रवृत्तम्। परिसरीयाध्यापकाः डा. चन्द्रकला आर्. कोण्डिः, डा. गणेशः टी पण्डितः, डा. विजयराघवाचार्यः डा. गिरिधररावः च क्रमशः-मम्मटोक्तकाव्यलक्षणस्य रसपरत्वम्, आत्मावलोकनविधिः, प्रलयनिरूपणम्, अवधानम्-इत्येतेषु विषयेषु विचारान् प्रत्यपादयन्। डा. सुब्रायः वि.भट्टः कार्यक्रमम् अधीक्षितवान्। डा. रामचन्द्रुलबालाजिः कार्यक्रममेनं समयोजयत्।

## अनौपचारिकसंस्कृतशिक्षणकेन्द्रम्

संस्थानस्य अनौ.सं.शि. केन्द्रमेकं शृङ्गेरीपरिसरेण २८.१०.०९तमे दिनाङ्के समुद्घाटितम्।शृङ्गेरी-पट्टणपञ्चायदध्यक्षः श्री टी.के. पराशरः कार्यक्रमे समुपस्थितः आसीत्। परिसरप्राचार्यः ए.पी. सच्चिदानन्दः उपस्थितानां संस्कृताभिमानिनां पुरतः संस्कृतशिक्षणस्य महत्त्वं, संस्कृतस्य भाषागतं सौन्दर्यं चाधिकृत्य अभाषत। डा. भगवान् सामन्तरायः (केन्द्रसंयोजकः) अनौ. सं. शिक्षणस्य उद्देश्यं स्पष्टीकृतवान्। श्री टी. आर्. कृष्णमूर्तिः (शिक्षकः) सभां सञ्चालितवान्।

## शोधच्छात्रसङ्गोष्ठी

शोधच्छात्राणां द्वितीया सङ्गोष्ठी २०.१०.०९तमे दिनाङ्के समजायत। श्रीमती गीता याजी, श्रीगणपतिशास्त्री, श्रीअनन्तकृष्णः च क्रमशः प्रकृतिसमीक्षणम्, विविधमतानुसारेण भक्तिस्वरूपविचारः, असिद्धिस्वरूपविचारः इत्येतेषु विषयेषु भाषणं कृतम्। शोधच्छात्राणां विषयोपस्थापनानन्तरं तत्तद्विषये प्रश्नोत्तरकार्यक्रमोऽपि अभवत्। प्राचार्यः सच्चिदानन्दमहोदयः अनुसन्धानप्रविधिमुद्दिश्य उपदिश्य, उच्चस्तरीयशोधकर्मणा परिसरस्य संस्थानस्य च गौरवं समेधयन्तु इति शोधच्छात्रान् निरदिशत्। डा. चन्द्रकान्त-डा. रामचन्द्रजोयिसाभ्यां कार्यक्रमोऽयं संयोजितः।

# जम्मूपरिसरे

### शिक्षादिवसः

११.११.०९तमे दिनाङ्के शिक्षादिवसः परिपालितः। तदङ्गतया आयोजिते कार्यक्रमे परिसरीयविद्वद्भिः शिक्षायाः महत्त्वमुद्दिश्य स्वीयाः विचाराः छात्राणां पुरतः प्रकटिताः।

### राष्ट्रिय-मूल्याङ्कन-प्रत्यायनपरिषदा परिसरनिरीक्षणम्

राष्ट्रिय-मूल्याङ्कन-प्रत्यायनपरिषदा २९.१०.०९तमे दिनाङ्के जम्मूस्थ-श्रीरणवीरपरिसरस्य निरीक्षणं कृतम्।

### भाषाशिक्षणम्

०९.१०.०९तमे दिनाङ्के आरब्धे परिसरीये अनौपचारिकसंस्कृतशिक्षणकेन्द्रे ४८ जनाः संस्कृतभाषाशिक्षणं प्राप्नुवन्। प्राचार्यस्य विश्वमूर्तिमहोदयस्य आध्यक्ष्ये प्रवर्तिते एतस्मिन् केन्द्रे डा. नारायणन् ई.आर्. संयोजकत्वेन, सुश्रीः नीतूशर्मा शिक्षिकात्वेन च कार्यमकुरुताम्।

### पाठशिक्षणाभ्यासः

जम्मूपरिसरे शिक्षाशास्त्रम् अभ्यस्यतां छात्राध्यापकानां छात्राध्यापिकानां च पाठनाभ्यासकार्यक्रमः २२.१०.०९ तः २२.१२.०९ पर्यन्तं जम्मूस्थ-विभिन्नविद्यालयेषु अभवत्।

### गान्धीजयन्ती

जम्मूस्थ-श्रीरणवीरपरिसरेण १.१०.०९तमे दिनाङ्के गान्धीजयन्ती-कार्यक्रमाङ्गतया सभा आयोजिता यत्र परिसरप्राचार्येण विश्वमूर्तिमहोदयेन स्वीये अध्यक्षभाषणे गान्धीमहात्मना प्रतिपादितसत्यम् अहिंसां चाधिकृत्य छात्राणाम् उद्बोधनं कृतम्।

# संस्थानविदुषां क्रियाकलापाः / उपलब्धयः

- श्रीवेङ्कटेशताताचार्यः (शृङ्गेरीपरिसरे मीमांसायां सहायकाचार्यः) स्वेन व्याकरण-मीमांसाशास्त्रयोः प्राप्तं प्रावीण्यमुपलक्ष्य श्री-श्री-भारतीतीर्थमहास्वामिभिः ऐषमः श्रीमहागणपतिवाक्यार्थसभायाः सम्पूर्तिसमारोहे स्वर्णाङ्गुलीयकेन समनुगृहीतः।
- डा. चन्द्रशेखरभट्टः (शृङ्गेरीपरिसरे सहायकाचार्यः) शृङ्गेरीश्रीशारदापीठाधीश्वराणां श्री-श्री-भारतीतीर्थश्रीचरणां पुरतः व्याकरणशास्त्र-महापरीक्षां समुत्तीर्य 'विद्वत्प्रवर'-बिरुदभाग् अभूत्।
- शृङ्गेरीपरिसरस्य अध्यापकाः डा. सुब्रायः वि.भट्टः, डा. सि.एस्.एस्.एन्. मूर्तिः, डा. नवीनहोल्लः, श्रीवेङ्कटेशताताचार्यः, डा. चन्द्रशेखरभट्टः, श्रीश्यामसुन्दरभट्टः, श्री-सि.एच्. के. पद्मनाभः च श्रीमहागणपतिवाक्यार्थसभायां श्रीचरणानां समक्षं विभिन्नविषयेषु शास्त्रार्थमकुर्वन्।
- डा. (श्रीमती) मिनती रथः (श्रीसदाशिवपरिसरे - पुराणविभागे उपाचार्या) - लेखनानुसन्धानमाध्यमेन नारीचेतनायां सशक्तयोगदानाय विशेषतः महाकविकालिदास-विदुषीविद्योत्तमासाहित्ये अपूर्वयोगदानाय उज्जयिनीस्थ-श्रीरामनामसेवाश्रमन्यासेन "विदुषी विद्योत्तमा" इति सम्मानेन पुरस्कृता।
- डा. सुकान्तकुमारसेनापतिः (श्रीसदाशिवपरिसरे सर्वदर्शनविभागाध्यक्षः) - तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य पारम्परिकशास्त्राध्ययन- समुत्कर्षकेन्द्रेण दिसम्बरमासस्य १५-१६ दिनाङ्कयोः आयोजितायां संस्कृतस्वाध्यायसामग्रीनिर्माणकार्यशालायां

- लखनऊपरिसरस्य पञ्च छात्राः (श्री-सन्दीपकुमारः, अनिरुद्धनारायणशुक्लः, आशुतोषशर्मा, अनुजशर्मा, हरशान्तवीरसिंहः च) उत्तरप्रदेश-संस्कृतसंस्थानेन वाराणस्याम् आयोजिते व्यासमहोत्सवे भागमगृह्णन्।
- शृङ्गेरीपरिसरच्छात्रैः इन्दौरनगरे उज्जयिनीस्थ-कालिदास-संस्कृत-अकादम्या ५.९.०९तमे दिनाङ्के समायोजिते उत्सवे आश्चर्यचूडामणिनाटकं प्रदर्शितम्।
- शृङ्गेरीपरिसरस्य श्रीप्रमोदभट्टः (व्या.आ.-II), कु. अर्चना कारन्ता (व्या.आ.प्र.), कु.सौम्या के. आर् (आ.द्वि.), कु. कुमुदाराव् (व्या.आ.द्वि.), कु.शिल्पा सी.जी. (सा.आ.द्वि.) च अक्टोबरमासे पुण्यपत्तनस्थया वेदशास्त्रोत्तेजकसभया सञ्चालितासु शास्त्रीयपरीक्षासु सफलाः भूत्वा अभिनन्दनभाजः अभूवन्।

## अनौपचारिकसंस्कृतशिक्षणम्

२००९-२०१०तमे शैक्षिकसत्रे अखिलभारतस्तरे जुलै-दिसम्बर मासयोः मध्यकाले प्रवृत्ते प्रथमत्रैमासिकचक्रे ६२५ अनौपचारिकसंस्कृतशिक्षणकेन्द्राणि सञ्चालयितुं विभिन्नप्रान्तसंयोजकेभ्यः अनुशंसा समधिगता राष्ट्रियसंस्कृत-संस्थानेन। तेषु एतावत्पर्यन्तं ५०४ केन्द्रेभ्यः उद्घाटनादिविवरणानि समागतानि। प्रथमद्वितीयतृतीयदीक्षासु आहत्य १७,०९६ अध्येतारः अस्याः योजनायाः लाभं प्राप्तवन्तः। प्रदेशानुसारेण **अध्येतॄणां सङ्ख्या** इत्थं वर्तते–

| राज्यम् | प्र.दीक्षा | द्वि.दीक्षा | तृ.दीक्षा | योगः |
|---|---|---|---|---|
| आन्ध्रप्रदेशः | २२८ | ५७ | – | २८५ |
| बिहारः | ३०९ | ६० | ४० | ४०९ |
| देहली | ६० | – | – | ६० |
| गुजरात् | ७०४ | ४० | – | ७४४ |
| हरियाणा | २६५ | – | – | २६५ |
| हिमाचलप्रदेशः | ४१४ | – | – | ४१४ |
| जम्मू-कश्मीरम् | २४५ | – | – | ८४८ |
| कर्णाटकम् | ७०८ | १४० | – | ८४८ |
| केरलम् | १८३ | – | – | १८३ |
| मध्यप्रदेशः | १२४६ | ३२० | १५९ | १७२५ |
| उत्तरपूर्व. | २६६४ | ४६७ | – | ३१३१ |
| उत्कलम् | २४०५ | २८७ | – | २६९२ |
| पञ्जाब् | १८७ | ६१ | – | २४८ |
| राजस्थानम् | ९४१ | ४६९ | – | १४१० |
| उत्तराञ्चलम् | १७८ | ४१ | – | २१९ |
| उत्तराखण्डः | १७८ | ४१ | – | २१९ |
| उत्तरप्रदेशः | १८०५ | ६३९ | ३२ | २४७६ |
| पश्चिमवङ्गाः | १२८८ | १२० | – | १४०८ |
| | | | योगः | १७०९६ |




विभिन्नप्रदेशेषु प्रवृत्तानां केन्द्राणां सम्बद्धानि कानिचन चित्राणि

कुलगीतलेखनाय समयावधिः विस्तारितः।
कवीनां प्रतिभायाः उपयोगाय सदवसरः।

# राष्ट्रियसंस्कृतसंस्थानस्य कुलगीतलेखनाय विज्ञप्तिः

राष्ट्रियसंस्कृतसंस्थानस्य कुलगीतमेकं भवेदिति कुलपतिवर्येण सङ्कल्पितमस्ति। उत्साहिनः विद्वांसः कवयः तादृशगीतं विरचय्य १०.३.२००९ दिनाङ्कात् पूर्वं संस्थानमुख्यालयं प्रति प्रेषयितुमर्हन्ति। प्राप्तानि गीतानि परिशील्य कुलगीतचयनसमितिः सर्वोत्कृष्टं गीतमेकं कुलगीतत्वेन निश्चेष्यति। कुलगीतलेखनावसरे कविभिः अधोनिर्दिष्टांशाः अवधेयाः। कुलगीतत्वेन स्वीकृतगीतस्य रचयितुः प्रतिभा पुरस्करिष्यते।

## कुलगीतलेखनावसरे अवधेयविषयाः

१. कुलगीतं सद्भावनासम्भरितं सत् संस्थानं संस्कृतं च प्रति आदरभावसमुद्दीपकं स्यात्।

२. गीतं गानानुकूलं सुश्राव्यं च स्यात्।

३. कुलगीतं नातीव दीर्घं स्यात्। निमेषद्वयाभ्यन्तरे निमेषत्रयाभ्यन्तरे वा (2 or 3 minutes) गातुं शक्येत।

४. कुलगीतस्य पदबन्धाः सुललिताः स्युः येन विभिन्नप्रान्तीयाः छात्राः अनायासेन शुद्धमुच्चारणं कर्तुं शक्नुयुः।

५. विषयदृष्ट्या कुलगीतम् साम्प्रतम्, अग्रिमेषु वर्षेषु च यदा कदापि गातुं योग्यं स्यात्। अर्थात् कुलगीते वर्णितविषयाः कालान्तरे अनौचित्यं न भजेयुः। उदाहरणार्थं–संस्थानस्य दश परिसराः सम्प्रति सन्ति। भविष्यति काले संस्थानपरिसराणां संख्यावर्धनं भवितुमर्हति। अतः कुलगीते परिसरसंख्योल्लेखः न भवेत्।

६. कुलगीते पूर्वकुलपतीनां वर्तमानकुलपतेश्च नामानि न स्युः।

७. कुलगीते राष्ट्रियसंस्कृतसंस्थानस्य नाम स्फुटतया सकृत् अवश्यमेव प्रकटितं स्यात्।

८. कुलगीतं केवलं संस्थानस्य महत्त्ववर्णनाय/केवलं प्रशस्तिगानाय न स्यात्। कुलगीतं श्रुत्वा मनसि ध्येयं समुद्दीप्तं स्यात्। गीतं कर्तव्यबोधं स्फोरयेत्।

९. कुलगीते संस्थानस्य लक्ष्यं सङ्केतितं स्यात्। (संस्थानस्य क्रियाकलापादिविषये यः कोऽपि कविः विस्तरेण ज्ञातुमिच्छति चेत् जालपुटं www.sanskrit.nic.in द्रष्टुमर्हन्ति।)

१०. कुलगीते संस्थानस्य अस्मितावाक्यस्य/ध्येयवाक्यस्य ('योऽनूचानः स नो महान्' इत्यस्य) उल्लेखः स्यात्।

११. संस्थानस्य स्थापनादिवसोत्सवे, परिसरवार्षिकोत्सवेषु, दीक्षान्तसमारोहे, अन्येषु एतत्सदृशेषु विशिष्टेषु अवसरेषु (यथा संस्थानेन निर्णीयेत) कुलगीतं छात्रैः/निर्दिष्टैः गेयं स्यात्।)

१२. कुलगीतत्वेन चिते गीते अपेक्षानुसारं इतोऽपि संवर्धनाय/संयोजनाय परामर्शं कुलगीतनिर्णायकविद्वांसः दातुमर्हन्ति।

१३. कुलगीतगानाय एकः रागः निश्चेतव्यः। तेनैव रागेण निर्दिष्टेष्ववसरेषु मुख्यालयकार्यक्रमे/परिसरकार्यक्रमेषु वा तद् गेयं स्यात्। अतः कवयः यदि कमपि रागं मनसि निधाय गीतं लिखन्ति तर्हि अधोनिर्दिष्टांशान् मनसि स्थापयेयुः। गीतस्योपरि रागनिर्देशमपि कर्तुं शक्नुवन्ति। (किन्तु रागनिर्देशः गीतलेखकानां कृते ऐच्छिकः, न तु अनिवार्यः)
   - गीतस्य भावसम्पोषकः रागः स्यात् (अर्थप्रकाशनानुकूलः रागः स्यात्।)
   - रागः सङ्गीतोपकरणैः सह, तद्विना वा गातुम् अनुकूलः स्यात्।
   - रागं संयोज्य गानावसरे सन्धिविच्छेदादिदृष्ट्या/अर्थदृष्ट्या अत्यन्तं विकारः (अर्थवैपरीत्यं वा) न स्यात्।

१४. इतः पूर्वं (पूर्वतनसूचनानुसारं ये कुलगीतं प्रेषितवन्तः ते अपि पुनः नूतनगीतं/पूर्वतनगीते स्वयम् अभीप्सितं परिवर्तनं संयोजनं वा कृत्वा प्रेषयितुमर्हन्ति।

१५. एकः कविः गीतमेकं गीतद्वयं वा प्रेषयितुमर्हति।

१६. गीतं संस्कृतभाषया निबद्धं स्यात्।

–कुलसचिवः







Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.II No.6 Pub. by the Registrar for Rashtriya Sanrkrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007